नरागतं तदा तत्सख्य के मासैरपत्यायुर्वदेद्ध्रुवं अथवापोक्लिमे तत्तु शकलं पुनरागतं तदा तत्सन्नके वाच्यं वालकायुर्विनिश्चि

श·	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
व·	९६	८२	५७	१२	६६	९५	१८	१८	१३	८२	८३	६६	८४	८५	८२	८२
मा·	४५	४२	२२	४२	१६	७६	३७	४३	१३	४२	३६	६०	३९	३९	३५	४५
दि·	३६	१२	१३	१३	१३	१८	३०	११	३०	१२	३०	६०	१२	८	४५	३०

तं अथवा कुत्रचित्स्थाने नागतं शकलं पुनः तदा चेच्छ
कले सौम्य तदा वर्षाणि संवदेत् क्रूरश्चेच्छकलं तस्य
मासकानि तदा वदेत् नाति सौम्यं नाति दुष्टं शकलं य
दि तद्वदेत् तदा मासैः फलं वाच्यं वालानां जीवितस्य
हि यस्मिंश्चके च वनैः प्रकटीकृतमस्ति च तच्चक्रमेत

र॰सि॰ ५५ ल्लिखितं द्रष्टव्यं सुविज्ञानता प्रसूतिः सुखरूपेण दुःखरूपेण वा भवेत् इति प्रश्ने कृते तत्र द्रष्टव्यं च प्रयत्नतः षष्ठे च प्रथम
स्थाने चेत् सौम्यं स्वा रिजं भवेत् सौम्यं वा मुन्कलीवं स्यात् सुखं सूते तदा वल्ला अथवा दाखिलं क्रूरं सावितं क्रूरमेव च यदागतं
तदा तत्र मरणं च विनिर्दिशेत् अथवा सौम्यसावीतं सौम्यं दाखिलमेव च यदागतं तदा तत्र दुःखं सूते विलासिनी अथवा
षष्ठके स्थाने तथैवैकादशे गृहे उत्कास्यं दुमराहं च तथैवा नवस्वारिजं नकीयतखदं चापि शकलं चेत् समागतं त
दा तु मरणं त्वेयं गर्भिण्यास्तु मनीषिभिः एतच्चेत् पञ्चमस्थाने शकलं पुनरागतं तदापत्यस्य मरणं विज्ञेयं निश्चितं बुधैः आरो
ग्यं चैव गर्भिण्यामित्याह यवनः पुरा अवृत्तवीरनामापि यवनः कश्चिदब्रवीत् गर्भिण्यारोग्यसंप्रश्ने सर्वथा निश्चयेन यत् तत्र
षष्ठाद्द्वादशान्तशकलाद् अन्यदेव हि उत्पन्नं शकलं कार्यं तस्मात् सर्वफलं दिशेत् दाखिलं स्वारिजं वापि सावितं मुन्कलीव
लं क्रूरं वापि तथा सौम्यफलं तदनुसारतः गर्भिण्याः प्रसवः कस्मिन् समये च भविष्यति इति प्रश्ने कृते तत्र रमलं कारयेद् बुधः
तत्रापि प्रथमस्थाने किंसंज्ञं शकलं स्थितं द्रष्टव्यं तत् प्रयत्नेन तत्फलं चापि किं भवेत् तस्यापि शकलस्यैव ग्रहः को सौ नि ५५
लोकयेत् तद्ग्रहस्य तु कोपास्तं चाप्यत्र विलोकयेत् अथवा प्रथमस्थाने शाकलं पुरुषालयं यदि स्यात् तत्फलं वाच्यं रात्रौ
स्यात् प्रसवस्त्विति॥ कस्मिन् मुहूर्ते प्रसवो भविष्यति विनिश्चितं पृच्छत्येवं पृच्छकश्चेद् द्रष्टव्यं च सदा बुधैः प्रथमस्थाने शकलं क

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

फलंतदनुसारेणावक्तव्यन्त्वप्रथयन्नतःप्रथमस्थानशकलंद्वितीयेपुनरागतंद्वितीयेतुमुहूर्तेस्यात्प्रसवोहितदाध्रुवंप्रथम।
स्थानशकलंतृतीयेचेत्समागतंतृतीयेतुमुहूर्तेस्यात्प्रसवोहितदाध्रुवंअनेनैवप्रकारेणाद्वादशावधिशोधयेत्तयतोयवन।
शास्त्रेस्मिन्मुहूर्ताद्वादशेवह्नियावत्परिमितंस्थानेशकलंपुनरागतंयावत्परिमितोज्ञेयोमुहूर्तेप्रसवोबुधैःप्रथमस्थानस
कलंनस्याच्चेत्पुनरागतंद्रष्टव्यंचप्रयत्नेनपञ्चमंशकलंतदापञ्चमंशकलंयस्मिन्स्थानेस्यात्पुनरागतंतत्संख्यकेमुहू
र्तेतुप्रसवःस्याद्विनिश्चितंअथवाप्रथमस्थानेपञ्चमस्थानकेपिवानुस्तत्ववारिजकंचेत्स्यात्तदानत्रफलंदिशेतमध्यान्हे।
वार्द्धरात्रेचप्रसवंस्याद्विनिश्चितंकस्मिंल्लग्नेभवेन्नूनंप्रसवश्चेतिपृच्छतियदातदातुद्रष्टव्यंनवमस्थानकंबुधैःनवमस्था
नकेचैवकिंसंज्ञंशकलंभवेत्तराशिस्तस्यभवेद्यावैतल्लग्नेप्रसवोभवेत्सभाग्यंवाप्यभाग्यंवाह्यपत्यंसंभवेदितिपृच्छके
नहातेप्रश्नेरमलंकारयेद्बुधःकृतेतस्मिंश्चरमलेपंचमाद्दृष्टमात्तथाउत्पन्नमन्यच्छकलंकरणीयंप्रयत्नतःउत्पन्नशक
लात्समात्तदापञ्चदशादपिउत्पन्नंमन्यच्छकलंकरणीयंविजानतातस्मात्सर्वंफलंवाच्यंशुभंवाशुभमेवचउत्पन्न
मेतच्छकलंलह्याणाख्यं३भवेद्यदिनुस्तहाखिलकंवापि२नुस्तत्ववारिजकंतथा३कञ्जुहाखिलः२संज्ञंवातथैवातवदा
खिलं२वयाजंवानरीकंवा३३फराख्यःमिजन्तिमायकं३जमातंवातस्तत्त्व३फलंवाच्यंमनीषिभिःसभाग्यंस्यात्प

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰ ५६

त्यंहिभाग्यंभोगादिकारि च शुभःस्वभावतोज्ञेयोनात्रकार्याविचारणा अथवात्तुशकलम्भवेदंकीशकंयदि ॥ उत्कारव्यं
वापि ॥ शकलंनकीयलखदम्भवा ॥ हुमराख्यत्तु ॥ शकलंतथैवातवखारिजं ॥ कब्रूत्तवाखिजकंवापि ॥ यस्मिन्स्याच्छक।
लेहित्ततदापत्यंदैवहीनंद्वेषभावमकिञ्चनउदारस्वापिक्लपरांवालकंसम्भविष्यतिइतिप्रश्नेक्तेतत्रमलञ्चविलो-
कयेत्प्रथमाच्छकलाच्चैवपञ्चमाच्छकलात्तथाउत्पन्नमन्यच्छकलंकरणीयंप्रयत्नतः द्वितीयाद्दशमाच्चैवकार्यंशक
लमुत्तमंलह्यायाणाख्यं ॥ भवेच्चेत्तच्छकलंयस्मिन्गतंयद्वालसत्तवारीजं ॥ फराख्यंवा ॥ भवेद्यदितरीकंवाभवेत्तु ॥ तथै
वपुनरागतंप्रथमस्थानकेवापिद्वितीयस्थानकेतथापञ्चमस्थानकेवापितथैवैकादशेपिवादशमस्थानकेवापितथा
पञ्चदशेचवाचतुर्दशेवासंस्थानेतदातत्रफलंनिर्दिशेत् अपत्यं स्याद्दुराचारं हिंदानशीलंनिरंतरं पद्धधनागमस्तस्यव्ययस्तद्द
द्भविष्यति अथवाकब्जदाखीलं ॥ तथैवातवरारिवलं ॥ नुसहाखिलकंवापि ॥ वयाजाह्व ॥ तथैवच इज्जमायाहं ॥ शक
लंयस्मिन्स्यात्तत्पुनर्गतंस्थानेषुपूर्वसूक्तेषुतदातत्रफलंनिर्दिशेत् द्रव्याढ्यंतदपत्यंस्याद्द्रव्यसंचयतत्परं अतिन्यूनतरस्तस्य ५६
व्ययःस्यान्नात्रसंशयः अथवात्तुशकलंलह्यकीशाख्यंभवेद्यदि ॥ हुमराह्व ॥ जमातंवा ॥ तथैवपुनरागतंस्थानेषुपूर्व
सूक्तेषुकुत्रचित्तर्हितत्फलंक्लपरांस्यात्तदापत्यंदुःस्वभावंतथैवच अथवात्तुशकलंनकीयलखदंभवेत् ॥ आतवेरवी

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

वापि ॥ कञ्जनखारिजकं तु वा ॥ उल्काख्यं वा भवेत्तत्तु ॥ तथैव पुनरागतं स्थानेषु पूर्वमुक्तेषु कदाचित्तु हि तत्फलं अभाग्यं तु तदा
पत्यमकिंचनमतीव हि नकीयत्नसर्वं प्रोक्तं ॥ हिंसाकलहकारकं आतंकं रवारिजं प्रोक्तं ॥ निन्दापैशून्यकारकं कञ्जनखारिज
कं प्रोक्तं ॥ व्यभिचारिपलायितं उल्काख्यं ॥ शकलं प्रोक्तं चौरं द्यूततरञ्चैव प्रेमपात्रं समकं रेमांतं स्याद्दानं वै भवेत् इति प्रश्ने
कृते तत्र मलं च विलोकयेत् प्रथमाच्छकलाच्चैव पञ्चमाच्च तथैव च कुर्यादन्यद्दिशकलं प्रयत्नेन तथा पुनः तस्मादुत्पन्न
शकलात्तथैव च चतुर्दशात् यच्छकलं कार्यमुत्पन्नं तच्चेत्सौम्यं तु दाक्षिणं तदा तु प्रेमपात्रं तु हस्तस्थं निकटे भवेत् यदि तच्छक
लं क्रूरं दाक्षिणं च भविष्यति तदा तत्प्रेमपात्रं तु दुःखलभ्यं प्रयत्नतः यद्यागतं तस्माच्चितं सौम्यं शकलं च भविष्यति तदा तत्प्रेमपा
त्रस्य सौहृद्स्थिरतां व्रजेत् यद्यागतं तस्माच्चितं क्रूरं शकलं च भविष्यति तदा तु प्रेमपात्रस्य वियोगः प्रेमपात्रतः कदाचित्समये
नैव जायते सुविनिश्चितं अथवा तत्तु शकलं क्रूरं स्यात् मुन्कलीवकं तदा तत्प्रेमपात्रं तु स्वहस्तेन गमिष्यति तेन साकं तु
मैत्री स्याद्विरोधः स्यान्निरंतरं अथवा तत्तु शकलं सौम्यं रवारिजमागतं आत्मनः प्रेमपात्रस्य मूलेनैवान्तरं भवेत् अथवा
तत्तु शकलं क्रूरं रवारिजमागतं तदात्मनः सकाशात्तत्प्रेमपात्रं गमिष्यति हृष्टात्मानं प्रेमपात्रं समीपेन गमिष्यति प्री
ति भवेत्तत्सकाशान्निश्चितं दुर्दशादिकं द्वयोर्मध्ये च मित्रत्वं भविष्यत्यथवा न च इति प्रश्ने कृते तत्र मलञ्चैव विचार

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

येतकेन्द्रस्यशकलानांच १४।७।१०।येभवन्त्यग्निविंद्वः तेषांसंगराणानाकार्याप्रयत्नेनतथापुनःपराफरे ७५।८।११॥
स्थितायेचसंभवन्त्यग्निविंद्वः तेषांचगराणानाकार्याकृत्वैतत्त्वविलोकयेत् पराफरस्थविंदुभ्योयदिकेन्द्रस्थविंद्वःव
हवःस्युस्तदामैत्रीभवेदात्मविभागतः प्रेमपात्रेणामित्रत्वंस्वयमेवकरिष्यतिएतस्माद्विपरीतंचेत्तदास्यात्प्रेमपात्रतः।
मित्रत्वंचेतिविज्ञेयंदैवशास्त्रविशारदैः इयंवार्तात्विदंमयत्नंसत्वंवानृतमेवच इतिप्रश्नेकृतेतत्रसमलंचविचारयेत् इति
स्यात्पञ्चमस्थानेसौम्यंदाखिलसंज्ञितंवार्तापत्रादिकंतर्हिसत्यंस्यान्नात्रसंशयः अथवाक्रूरखारीजन्मुन्थलीवंतथा
शुभंयद्वाचशुभसावीतंयदिस्यात्पञ्चमेगृहेयत्रवार्तादिकंसत्यंतदामिथ्याभवेद्ध्रुवं अथवापञ्चमस्थानेतुस्तत्वा
रिजकंभवेत्सौम्यंचमुन्थलीवंचतदातत्रफलंदिशेत् यत्रवार्तादिकंकिंचित्सत्यंमिथ्याचवैतथा कस्मिंस्तुदिवसेवार्ता
स्वागमिष्यतितत्वतः इतिप्रश्नेकृतेतत्रसमलंचविचारयेत् पंचमस्थानसंस्थंतुयद्दैशकलकंभवेत् तस्यायःसंभवत्वेट
त्तस्ययोवारउच्यतेआगमिष्यतिवार्ताचतस्मिन्वारेविनिश्चितंअपूर्ववस्तुप्राप्तिश्चतदाहूतस्यचैवहिपृष्ठेनकृतेम
श्रेसमलंचविलोकयेत्प्रथमात्पंचमाच्चैवकार्यंशकलमुत्तमं एकादशात्तृतीयाच्चकार्यंशकलमुत्तमं एतयोरुभयोर्यो
गात्कार्यमन्यत्प्रयत्नतः निष्पन्नमेतच्छकलंयदिस्यात्सौम्यंदाखिलंसौम्यंस्यान्मुन्थलीवंचतदातत्रफलंवदेत्तदा

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

गमिष्यति परन्तु चिरकालेन रिक्तहस्तश्चैव ध्रुवं अथवा तत्तुशकलं सौम्यं स्यात्सुन्कलीवकं तदा तु किं चिरागच्छेन्नाग
च्छेत्किं चिरेण हि अथवा तत्तुशकलं क्रूरं स्वारिजकं भवेत् क्रूरसावितकं चैव क्रूरं चैसुन्कलीवकं तदा पूर्ववस्तुजातं दूतस्य
नागमिष्यति सत्यं वदति दूतोयं यद्वा मिथ्या वदत्यसौ इति प्रश्ने कृते तत्र समलं च विचारयेत् अथ मस्यान शकलं यदि स्या
त्सौम्यसावितं यद्वा सौम्यं दारिवलं स्यात्तदा सत्यं वदत्यसौ अथवा तत्तुशकलं सौम्यं स्वाभ्रिजकं भवेत् सौम्यं वा सुन्कलीवं
स्यात्तदा तत्र फलं दिशेत् किंचित्सत्यं च विज्ञेयं किंचित् मिथ्या वदत्यसौ अथवा तत्तुशकलं क्रूरं स्वाभ्रिजकं भवेत् क्रूरं च
मुन्कलीवं स्यात्क्रूरं सावितमेव च तदा मिथ्या वदत्येव सत्यं नैव भवेत्कदा अथवा न तु शकलं मंकीशास्व्यं भवेद्यदि == तदा
वदति मिथ्या सौ परंतु सत्यवत्कृते अथवा तत्तुशकलं बुधदेवतकं भवेत् तदा वदति मिथ्या सौ प्रश्ने तथ्यं प्रपंचितं आनंदस्य
महोत्साहो भविष्यति न वा भवेत् इति प्रश्ने कृते तत्र समलं च विलोकयेत् अथ मातं च मात्कार्य सुत्पन्नं शकलं पुनः चतुर्द
शैकादशकयोगतोन्यहि निर्ममत एतयोरुभयोर्योगादन्य च्छकलमुत्तमं एतस्माच्छकलात्सर्वफलं ज्ञेयं मनीषिभिः
एतच्च च्छकलं सौम्यं दारिवलं च भविष्यति तदानंदोत्सवादीनि कार्याणि च भवंति हि आरम्भप्रसमाप्तिश्च शीघ्रका
लेनैव भवेत् अथवा तत्तुशकलं मंकीशास्व्यं भवेद्यदि == तदानंदोत्सवादीनि कार्याणि च भवंति हि परंतु प्रांतकाले चलेत्

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र-सि- शसंभारकारकम् अथवातत्तुशकलंक्रूरंस्वाभिजकंभवेत क्रूरंवासुन्कलीवंस्यात्क्रूरंसावित्तकंचवा तदानंदोत्सवाद्यंचका
५८ र्येनस्याद्दितिस्फुटं अथवातत्तुशकलंसौम्यंस्वाभिजकंभवेत सौम्यंवासुन्कलीवंस्यात्तदातत्रफलंदिशेत आनंदोत्सवका
र्येद्दिकिंचित्स्यान्नचकिंचन इतिपंचमभवनम् षष्ठकेभवनेयत्स्याद्दृष्टव्यंतल्लिखाम्यहं पलायितस्यनष्टस्यचोरस्यचरु
जस्तथादासीपुत्रस्यदासास्युस्तथैवचचतुष्पदः द्विशफायत्सुतुष्यान्स्यात्तासांश्चैवतस्यच पक्षिणांचैवसंप्रश्नःषष्ठकेभव
नेभवेत दृष्टव्यंषष्ठकेस्थानेद्वितीयंप्रथमंचवै एतत्स्थानत्रयेचैवशकलंसौम्यदारिवलं सौम्यंवासावित्तंचेत्स्यात्तदातत्रफ
लंदिशेत पलायितःपरावृत्यह्यागच्छतिवसन्निधौ एतत्स्थानत्रयेचेद्धाक्रूरंदारिवलकंभवेत कुत्रचिच्चिरकालेनतंक।
श्चिद्धारयिष्यति एतत्स्थान द्वयेयद्वाक्रूरंस्वाभिजकंभवेत क्रूरंवासुन्कलीवंस्यात्क्रूरंसावित्तकंतुवा तदापलायितस्ये
हप्राप्तिर्नस्यादितिस्फुटं अथवाषष्ठकेस्थानेदारिवलंसमुपागतं तदापलायितस्यापिसन्निधौचद्वितीयकः वर्ततेपुरु
षःकश्चिदितितत्रफलंदिशेत अथवाषष्ठकेस्थानेसावित्तंसमुपागतं पलायितस्तदाचास्तिसभामध्येविनिश्चितं अथ ५८
वाषष्ठकेस्थानेस्वाभिजंसमुपागतं सुन्कलीवंभवेद्यद्वातदैकाकीचवर्ततेतस्मात्सर्वंफलंवाच्यंयथाह्ययवनःपुराएत।
च्छकलकंचैवदारिवलसावित्तत्तुवापलायितस्तदाचास्तिपुरमध्येविनिश्चितं अथवैतत्तुशकलंस्वाभिजंयदिवैभवे

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

१२ अथवैनत्तुशकलं सुन्कलीवं यदा भवेत् तदा तु नगरात् गंतुमिछ्छते स पलायितः अथवैनत्तुशकलं दाखिलं सावितं तु वा
यदि स्यात्तु रमध्ये तु वसते वै पलायितः अथवैनत्तुशकलं खारिजं यदि वै भवेत् तदा तु नगराद्दूरे गतं स्याच्च पलायितः
अथवा तत्तुशकलं कूरं खारिजं भवेत् दूरमार्गे स्थितश्चैव नगरात्तु पलायितः अथवा तत्तुशकलं सौम्यं स्यात्सुन्कलीवकं
तदा गंतुं प्रकुरुते अपन्नं च पलायितः अथवा तत्तुशकलं कूरं स्यात्सुन्कलीवकं पलायितस्तदा मार्गे गच्छतीति विनिश्चि
तं अथवा तत्तुशकलं जमातास्यं भवेद्यदि ≡ इज्जतमा ≡ पाह्वयं चापि तदा तत्र फलं दिशेत् यस्मात्स्थानात्समायात स्तत्स्था
ने च गतः पुनः गवेषणा कृतस्यापि भवेत्प्राप्तिः पलायितः नवा भवेदिति प्रश्ने रमलं च विलोकयेत् प्रथमस्थानशकलं यदि स्म
न्स्थाने पुनर्गतं ततः सर्वफलं वाच्यं हीत्याह यवनः पुरा प्रथमस्थानशकलं केन्द्रस्थाने भवेद्यदि आवेषणा कृतस्तर्हि प्रा
प्तः स्याद्धि पलायितः प्रथमस्थानशकलं ह्यागतं वै परोफरे तदा गच्छति मार्गेणा निश्चितं प्रपलायितः प्रथमस्थानशकलं
यथापोल्किमके भवेत् तदा नत्वन्वयो नादृश्या निश्चयेन पलायितः गवेषणा करोतिक्त पाणिश्चैवागमिष्यति वस्तुजातं तु त
न्नष्टं पुनर्हस्तगतं भवेत् नवेति वैक्ते प्रश्ने रमलं च विलोकयेत् षष्ठकात्सप्तमाच्चैव शकलं कार्यमुत्तमम् तच्चेत्सौम्यं दा
खिलं स्यात्तदा तत्र फलं दिशेत् समग्रं वस्तुजातं हि प्राप्तं भवति निश्चितं अथवा तत्तुशकलं सौम्यं सुन्कलीवकं भवेत् तदा किं

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰
५६

चिह्नवेत्प्राप्तं किं चिन्नेति च संदिशेत् अथवा तत्तु शकलं क्रूरसुन्दलिं वं भवेत् क्रूरं स्वारिजकं वापि क्रूरं सावित्तमेव च तदा किं
चिद्वस्तु जातं प्राप्तं न स्यादिति स्फुटं अन्यन्मतान्तरं वक्ष्ये प्रश्ने नष्टस्य वस्तुनः अमले षोडशस्थाने स्थिता ये युगविंदवः ते षां तु गण
नाकार्या द्वाभ्यां वै भागमाहरेत् एकशेषे भवेन्नष्टप्राप्तिश्चेति विनिर्दिशेत् द्विशेषेन भवेत्प्राप्तिः कदाचिन्नष्टवस्तुनः अन्यच्च म
तांतरं वक्ष्ये प्रश्ने नष्टस्य वस्तुनः यदि स्यात्सप्तमस्थाने कजद्वाविलकं तु वै ॥ नसद्वाविलकं वापि ॥ तथैवातवदाविलं ॥ अ
नायासस्तदा प्राप्तिः पूर्णा स्यान्नष्टवस्तुनः अथवा तत्तु शकलं लह्याणाख्यं ॥ भवेद्यदि नुसत्वारिजकं वापि फराख्यं ॥ ॥ श
कलं तु वै तदा स्वल्पतरं वस्तु प्राप्यते सुविनिश्चितं अथवा तत्तु शकलं वयाजाख्यं ॥ भवेद्यदि इज्जमायाह्वयं ॥ चापि जमाता
ख्यं ॥ तथैव च तदा वादादियत्नेन प्राप्तिः स्यान्नष्टवस्तुनः अथवा तत्तु शकलं ह्यंकीशाख्यं ॥ भवेद्यदि तरीकाख्यं ॥ भवेद्वापि
तदा तत्र फलं दिशेत् तदा ईदृशया ज्ञैशेः प्राप्तिः स्यान्नष्टवस्तुनः अथवा सप्तमस्थाने नकीयल स्वरं भवेत् ॥ कज्जतवारिज
कं वापि ॥ हुमराख्यं तथैव च ॥ उक्ला ॥ ख्यं शकलं चैव तदा तत्र फलं दिशेत् भविष्यति कदा नैव संप्राप्तिर्नष्टवस्तुनः चोरप्रश्ने
तु स मलः कथ्यते त्र मया धुनाय दृष्ट्वा वस्तु नश्चौरं वस्तु चतायते ध्रुवं संबंधः प्रथमस्थाने पृच्छकस्य च वर्तते द्वितीयस्थानसम्बन्धो
वर्तते चौर्यवस्तुनः सप्तमस्थानसंबन्धस्तस्करस्य च वर्तते अष्टमस्थानसम्बन्धश्चोरनीतस्य वस्तुनः यस्मिन्स्थाने पृच्छकेन स्यापि.

५६

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

स्थापितंवस्तुजातकंतस्यस्थानस्यसंबंधोदशमेस्थानकेभवेत्कृत्वातुसमलंसर्वंसम्यक्तच्चविलोकयेत्हुमरा॥कदाचित्वारीतं॥
आतवेस्वारिजंतथा॥यदिनायातिसमलेनदातहस्तुजातकंतस्कोरेणचननीतंस्वयंचविस्मृतोभवेत्अथवाप्रथमस्थानेहितो
येसप्तमेतथाषष्ठस्थानेचलहारा॥तस्यातवारिजकंतथा॥फरास्यंवा॥तरीकंच॥समागच्छतिचेद्ध्रुवंपृच्छकेनतदावस्तुव्ययश्च
वक्तोभवेत्अथवाकुत्रचित्स्थानेस्थापितंस्थानत्रयंपुनःअथवाप्रथमस्थानेहितोयेसप्तमेतथाअष्टमेचतथास्थानेशकलं
दासिवलंभवेत्यदातदावस्तुयुक्तस्तस्करोलभतेध्रुवंतस्करःप्रकटोभूयान्नवेतियदिपृच्छतितदातुसमलंकुर्यात्तत्रस्थायचवि
दवःतेषांयुगायुगानांचकर्तव्यागणनाध्रुवंद्वाभ्यांतुभक्ताद्यच्छेषंफलंतस्मात्द्दीरयेत्एकशेषेनप्रकटोहिशेषे२प्रकटोभ
वेत्तस्करःकिंपुमानस्तिकामिनीवापिवर्त्ततेइतिप्रश्नेकृतेतत्रसमलंचविलोकयेत्युगायुगानांविंदूनांकर्त्तव्यागणनाध्रुवं
त्रिभिर्भक्तेभवेच्छेषंफलंतस्माद्दीरयेत्एकशेषेपुमांश्चौराहि२शेषेकामिनीभवेत्त्रिशेषे३बालकंविद्यास्त्र्याहयवनःपु
राकुत्रास्यस्तस्करश्चौरइतिप्रश्नेकृतेसतिकृत्वातुसमलंतत्रतस्मिन्येविंदवोमताःतेषांयुगायुगानांचकर्त्तव्यागणनाध्रुवंत्रि
भिर्भक्ताद्भवेच्छेषंफलंतदनुसंदिशेत्एकशेषेगृहप्रांतेतस्करस्यविशेषतःपृच्छकस्यैवशेषस्यनिकटोक्वायव्यांकितेहिशे
षेस्वीयगेहस्थश्चौरइत्येवसंदिशेत्त्रिशेषे३परकीयःस्याच्चौरोग्रामांतरस्थितःरात्रौ२स्यकीदकस्यादितिप्रश्नेकृतेसति

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र·सि· ६०

कृत्वादौ तत्र समलं तत्र ये विंदवः स्मृताः तेषां युगायुगानां च संख्या कार्या प्रयत्नतः त्रिभिर्भक्ताद्भवेच्छेषं यत्ततः फलमादिशेत्
एकशेषे शौरवर्णः कृष्णपीतो भवेद्ध्रुवं द्विशेषे चौरवर्णस्तु लोहितश्चेत उच्यते त्रिशेषे चौरवर्णस्तु गोधूमाभो भविष्यति अथ
वा हरितो वर्णः श्वेतस्य च भविष्यति तस्करः पुरमध्ये तु वर्तते वा न वेति च प्रश्ने कृते तु धस्त्तत्र समलं हि विलोकयेत् प्रथमाच्च
चतुर्थाच्च सप्तमाद्दशमात्तथा शकले कार्य उत्पन्ने ताभ्यामन्यच्च साधयेत् साधितं शकलं चैतद्वा खिलं साधितं तु वा यदि
स्यात्तत्फलं प्रोक्तं चौरः स्यात्पुरमध्यगः अथ वैतत्तु शकलं खासिजं यदि जायते पुरमध्ये तदा नास्ति तस्करश्चेति निश्चितं
अथ वैतत्तु शकलं सुन्कलीवं यदा भवेत् तदा चौरः पुरे चास्ति परं तु गमनोद्यतः अन्यन्मतांतरं वक्ष्ये यज्ज्ञात्वा फलमादिशे
त् अष्टमं शकलं चैव द्वादशं शकलं तथा चतुर्दशं च शकलं तथा पंचदशं च वै एतेषां शकलानां हि क्रमेणोपरि विन्दवः ए
कत्र करणीयाश्च तदेकं शकलं भवेत् एतच्छकलकं चेत्स्याद्वा खिलं साधितं तु वा पुरमध्ये तदा चौरो वर्ततेसु विनिश्चितं
अथ वा तत्तु शकलं स्वारिजं यदि जायते तदा ग्रामाद्बहिर्यातस्तस्करश्चेति निश्चितं अथ वा तत्तु शकलं सुन्कलीवं यदा भवेत्
तदास्ति पुरमध्ये तु गंतुकामश्च तस्करः चौरः कोयं स्वभावेन शीघ्रं नेनं संहतास्ततः इति प्रश्ने कृते तत्र समलं च विलोकयेत् अष्ट
मं द्वादशं चैव तथैव च चतुर्दशं शकलं पंचदशमं एतेषामूर्ध्व विंदवः क्रमेणैकत्र कार्यास्ति तदेकं शकलं भवेत् एतत्पूर्वं तु

६०

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

दैवाज्ञावलोकयेत् एतच्छकलकस्थानं सुक्लिपक्षेणायद्भवेत् फलं तदनुरूपेणावक्तव्यं च मनीषिभिः एतस्य सुक्लिपक्षेण
स्थानं चेत्प्रथमं भवेत् तदा चोरः स्वकीयः स्याद्गृह एव विनिश्चितं कदाचित्सुक्लिपक्षेणाभवेत्स्थानं द्वितीयकं तस्करस्तु तदा ज्ञे
यो गृहेषु व्यवसायिनां कदाचित्सुक्लिपक्षेणात्तस्थानं च तृतीयकं भगिनीबंधुसुहृदां मित्राणां च गृहेषु च तस्करो वर्त्तते नित्य
मिति तत्र फलं दिशेत् कदाचित्सुक्लिपक्षेणास्थानं स्याद्धि चतुर्थकं पितुः पितामहस्यापि पिक्षपिकारस्यैवं गृहे ऽग्रामवासिना
मेव तदा भवति तस्करः कदाचित्सुक्लिपक्षेणास्थानमेतस्य पंचमं दूतानां प्रेमपात्राणां वेश्यानां नृत्यकारिणां कलावतानां गु
णीनां चौरोऽस्ति सदनेषु च कदाचित्सुक्लिपक्षेणास्थानमेतस्य षष्ठकं तदा स्याद्दासदासीनां सेवकानां गृहेषु च कदाचित्सुक्लि
पक्षेणास्थानमेतस्य सप्तमं दायादानां च नारीणां गृहे स्यात्तस्करस्तदा कदाचित्सुक्लिपक्षेणास्थानमेतस्य चाष्टमं इन्द्रजालकृ
तां चैव तथा वृत्तिवतां गृहे मार्गस्थानां तु गेहे नृणां प्रेतकर्मकृतां तथा गृहेषु वर्त्तते चौर इति तत्र फलं दिशेत् कदाचित्सुक्लिपक्षे
णा नवमं स्थानकं भवेत् तथा तीर्थकृतां गेहे तथैवातिथिनां चैवेत्तपस्विनां च पंथानां श्रेष्ठानां सदनेषु च वर्त्तते चौर इत्येत
न्निर्दिशेच्च प्रयत्नतः अथवा सुक्लिपक्षेणादशमं स्थानकं भवेत् राज्ञां चैव प्रधानानां तथा मुद्राधिकारिणां गृहेषु ज्ञातमानं च
वर्त्तते चौर इत्यपि कदाचित्सुक्लिपक्षेणास्थानमेकादशं भवेत् मित्राणां च तथात्मानां गृहे वसति तस्करः कदाचित्सुक्लिप

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

सेशस्थानेंद्दादशकंभवेत् कारागृहस्थितानांच लोकजाग्रतिकाशिरांनीचानांद्यूतकानांचमध्येवसतितस्करः धनिकस्य
चचौरस्यगृहेद्दयोमध्येदेशकः गृहाणिकतिसंतीतिकृतेप्रश्ने विलोकयेत् पंचमस्थानकेचैवषष्ठस्थानेतथैव च सप्तमस्था
नकेचैवनवमस्थानकेतथा शकलानिचयानिस्युस्तेषांयेविंदवोमताः तेषांसमासमानांचविंदूनांगणनाभवेत् पंचम
स्थानशकलविंदुभिर्भागमाहरेत् शेषंतुयत्प्रजायेतत्संख्यानिगृहाणिच उभयोर्गृहयोर्मध्येवर्ततइतिनिश्चितंतस्करस्य
गृहंकस्यांदिशायांचैववर्ततेइतिप्रश्नेकृतेतत्ररमलेच विलोकयेत् रमलेदशमस्थानेशकलेयद्भविष्यतितस्यैवेशकलस्ये
ह्यादिशावैप्रकीर्तिता फलंतद्ग्रहपंहिवक्तव्यंचप्रयत्नतः प्राच्यांवापिप्रतीच्यांवादक्षिणोत्तरयोस्तथातस्करस्यगृहः
द्वारंकस्यांदिशिचवर्ततेइतिप्रश्नेकृतेतत्ररमलंच विलोकयेत् नवमस्थानशकलेयद्भवेत्तस्यया दिशाफलंतद्दिशयावाच्यं
होत्याहयवनः पुरातस्करस्यगृहद्वारंकीदृशंतत्रवर्ततेइतिप्रश्नेकृतेतत्ररमलंच विलोकयेत् जमानमिज्तिमायवा ॥ यदि
स्यान्नवमेगृहेतदातस्करगेहस्यद्वारस्थलेखितंध्रुवं अथवानवमस्थानेहुमराणवानकीभवेत् ॥ तदातस्करगेहस्यद्वारं
ध्रुवंतंभविष्यतिभवेद्वेवहद्दरज्जुकृतयारेखायुतंयुवा अथवानवमस्थानेलह्याणशकलंभवेत् यद्वाचनुसनहारवीलं ॥ त
दातत्रफलंदिशेत् तदातस्करगेहस्यद्वारंविविधराजितं अकीशंचोकलावापि ॥ यदिस्यान्नवमेगृहेतदाचौरगृहद्वारंस्या ॥ ६२

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

नेफरास्यं ॥ शकलं भवेत् आनेवेद्दा रिवलं वापि ॥ तदा तत्र फलं दिशेत् तदा चौरगृहद्वारं लेपितं गोमयं भवेत् स्वलंकृतं भवेत्
त्रनिर्दिशेदिति निश्चितं यद्वा तु सप्तवारिजे कज्ञ्वद्दारिवलकं तु वा ॥ ॥ यदि स्यान्नवमस्थाने तदा तत्र फलं दिशेत् द्वारमुत्तरे वा
स्वर्वंवा समरणीयं तथैव च अथवा कज्ञ्वतवारिजे द्दा तेवे वारिजे तथा ॥ ॥ यदि स्यान्नवमस्थाने तदा तत्र फलं दिशेत् संध्याकारं
च निम्नं च तदा द्वारं विनिर्दिशेत् अथवा नवमस्थाने वयाजे च तत्र रौक्कके ॥ ॥ सुक्तं च निःकपाटं च द्वारं स्याज्जलसन्निधौ त
स्करस्य स्वरूपं हि विग्रहेणा कथं भवेत् इति प्रश्ने कृते तत्र समलं च विलोकयेत् यत्किंचित्स्व कलेचेत्स्यात्सप्तमस्थानके
गते फलं तदृतुरूपेण कथनीयं मनीषिभिः शुभे च सप्तमस्थाने लग्नाणां ॥ शकलं भवेत् तदा चौरश्च भवति विशालास्यो वि
शालाननः विशालभालदेशश्च कृशनासिकमेव च असंस्पृष्टं च कटीभिर्विक्षतास्त्रश्चवे भवेत् कृष्णकेशः श्वेतदेशपीतमि
श्रितवे भवेत् तस्याननेकन्धे वा भाले वा तिलचिन्हकं अथवा सप्तमस्थाने कज्ञ्वद्दारिवलं ॥ मागतं तदा चौरश्च तुष्को
णोन गुरुर्नेल घुश्चवे श्वेतपीतारुणो वर्णो रूपलक्षशरीरकः गोधूमवर्णसदृशः शरीरे बहुकेशधृक् कृष्णवर्णः कृष्णकेशो
भालभ्रूयुगलश्चवे स्थूलशीर्षो महद्भालो यदा चिन्हश्चवे भवेत् ग्रष्ठस्थानस्थितश्चैव स्थूलदंतश्चवे भवेत् अथवा स
प्तमस्थाने कज्ञ्वतवारिजे ॥ मागतं तदा तु श्रमयुक्तो रोमिथ्यावादी च निन्दकः कृष्णनेत्रः कृष्णकेशो श्लिष्टभ्रूयुगलश्च

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

वैहस्वपादो ह्रस्वहस्तस्तिर्यगंगुलिरेवच मांसलश्च ह्युचितश्च वा सचक्षुः स्मितो भवेत् तस्य वक्षसि रोमाणि सुबहूनि भवंति च
तस्यानने च नासायां हरितो पि दृश्यामलः नीचवृद्धिर्दीर्घकेशकर्णास्तस्कर एवच अथवा सप्तमस्थाने जमातं ≡ शाकलं भवेत्
तदा चौरस्तु ष्कोणः स्थूलशीर्षललाटकः तदाविरलदंताश्च स्तः स्यात्तन्मुखोपरि त्रिभिर्वर्णैर्मिश्रितश्च देहस्तस्य भवेद्ध्रु
वं अथवा सप्तमस्थाने फरास्यं शकलं भवेत् ∴ अप्राप्तयौवनस्तर्हि चोरः स्यान्नात्र संशयः श्मश्रुहीनो भवेत्सोपि स्वल्पश्मश्रुश्च
वा भवेत् भव्यमूर्तिः कृष्णनेत्रः कृशनाशः प्रकीर्तितः संमीलितरदश्चैव स्वेतदेहश्च तस्करः अथवा सप्तमस्थाने उक्ला ≡ ख्यंश
कलं भवेत् तदा चौरस्तुष्कोणो मांसलश्च प्रकीर्तितः न दीर्घो न च ह्रस्वोपि कृष्णदेहश्च वै भवेत् दासीपुत्रादिनीचानां मध्ये
दृष्टव्यमेवच अगुणास्तस्य नेत्रे स्याद् द्वाकाराणामेवच स्वल्पश्मश्रुः कृशोरुश्च वक्रदंतश्च कीर्तितः तस्य शीर्षं च देहे वा चि
न्हे स्यान्नात्र संशयः अथवा सप्तमस्थाने चांकीशं ≡ शकलं भवेत् तदा चौरो महादेहश्चतुष्कोणश्च वा भवेत् स्थूलोष्ठः स्थूल
देहश्च स्थूलवाहुश्च वै भवेत् वक्रकेशः पिंगलाक्षः कृष्णदेहश्च वै भवेत् दीर्घदन्तो दीर्घनासा पादयोरगुणो भवेत् अथवा सप्त
मस्थाने हुमरा ≡ शकलं भवेत् तदोच्चैर्नितरां चौरो रक्तदेहः प्रकीर्तितः नयनेषु सचिन्हः स्याद्विशालगलगंडकः अथवा सप्त
मस्थाने वयाज ≡ शकलं भवेत् तदा चौरः श्वेतदेहः पूर्णांगः सुंदराननः मिलितभ्रूः सूक्ष्मशीर्षो विशालास्यः प्रकीर्तितः तस्य

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

तशरीरधृक् अथवा सप्तमस्थाने तु सुतवारिजकं भवेत् ॥ तदा चौरो न चातिदीर्घो नातिह्रस्वः प्रकीर्तितः श्वेताकारशरीरश्च सूक्ष्म
शीर्षः प्रकीर्तितः विशालभालदेहश्च विशालनयनश्च वै वहुभ्रूतिलकश्चैव दक्षिणांगे च चिन्हधृक् अथवा सप्तमस्थाने तु ।
सद्वृश्चिकलकं ॥ भवेत् तदा चौरश्चतुष्कोणो वर्तुलास्यः प्रकीर्तितः कृष्णनेत्रो विभक्तभ्रूः स्थूलशीर्षश्च कीर्तितः विशालभाल
देहश्च निवर्णांगश्च तस्करः अथवा सप्तमस्थाने ह्यातवे खवारिजं ॥ भवेत् तदा दीर्घश्च पुष्टश्च तस्करः संप्रकीर्तितः हस्तांगो दुर्दृ
शास्यश्च मार्जाराकार एव च नीलस्थाने चाथवा वक्रनेत्रश्चैव प्रकीर्तितः तस्य नेत्रो भवेत् क्लिष्टरुणाश्च विनिश्चितं यद्वा नक्तान्धता
तस्य भविष्यति विनिश्चितं अथवा नेत्रमध्ये तु पुष्पं स्यान्नात्र संशयः अथवा मांसवृद्धिः स्यात् तस्य नेत्रे विनिश्चितं देहेन कृष्णपी
तश्च यद्वा रक्तशरीरधृक् अथवा सप्तमस्थाने नक्रीयलखर्द भवेत् ॥ तदा चौरो भवेद्दुष्टैः पुष्टांगश्च विनिश्चितं नीचनेत्रः श्वेतध्वां
क्षो विशक्तदर्शनेश्च वै यद्वा पतितदन्तश्च मिलितभ्रूयुगश्च वै कृशोदरमश्रुहीनश्च तन्नेत्रे श्वेतता भवेत् लंबनासश्च विज्ञेया मूल
वांगुलिकश्च सः स्थूलशीर्षमुखेन तस्य सतं स्याच्च विनिश्चितं गोधूमवर्णसदृशोऽप्यथवा श्वेतरूपधृक् अथवा सप्तमस्थाने ह्या
तवेह्राखिलं ॥ भवेत् तदा चौरो दीर्घतरः कृशदेहश्च निश्चितं श्वेतवर्णश्च दीर्घाक्षो नीलनेत्रश्च वर्तते अथवा दुर्दरासश्च सूक्ष्म
शीर्षः प्रकीर्तितः विभक्तभ्रूयुगश्चैव तस्करः संप्रकीर्तितः सुखवानासिकायां च चिन्हं स्यात् स्तनजं च वै अथवा सप्तमस्थाने ।

CC-0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰
६३

ज्ञमायाहृयं भवेत् ॥ तदा गो धूमवर्णश्च तस्करः संप्रकीर्तितः बहुभूतिलकश्चैव स्थूलदास्यः प्रकीर्तितः ह्रस्वनेत्रो दीर्घकेशश
च्चनासः प्रकीर्तितः दीर्घो लघुश्च देहेन हस्तांगः संप्रकीर्तितः अथवा सप्तमस्थाने तरीकं ॥ शकलं भवेत् तदा गो धूमवर्णश्च
किंचित्पीतेन मिश्रितः उच्चनासो दीर्घकेशः स्वल्पश्मश्रुश्च तस्करः सूक्ष्मदन्तश्च विज्ञेयश्चिन्हं स्यात्तस्य विग्रहे चौरेणावस्तु
जाते च कुत्र स्थाने कृतं भवेत् इति प्रश्ने कृते तत्र समलं च विलोकयेत् द्वितीयादशमाच्चैव कार्यं शकलमुत्तमं दशमाद्वाद
शाच्चैव कार्यं शकलमुत्तमं एतयोरुभयोर्योगात्कार्यं शकलमुत्तमं एतस्माच्छकलाच्चैव फलं सर्वं समादिशेत् उत्पन्नं
शकलं तत्तु रक्काख्यं ॥ यदि जायते तदा चौरेणाहृतवस्तु निःक्षिप्तं धरणीतले यद्वा दक्षिणादिग्भावे कृत्वा संपुटके शुभे पृथि
व्यां निहितं च स्यादित्येवं फलमादिशेत् अथवा तत्तु शकलं ह्यंकीशाख्यं ॥ भवेद्यदि तदा चौरेणाहृतवस्तु प्रतीच्यां निहितं
भवेत् वृक्षे वा क्षितिगर्भे वा तथैवोच्चगृहोपरि अथवा तत्तु शकलं हुमराख्यं ॥ भवेद्यदि तदा चौरेणाहृतवस्तु दग्धे च धरणी
तले अग्न्यागारे अथवा गुप्तं स्थापितं चानीतहृदेत् अथवा तत्तु शकलं जमाताख्यं ॥ भवेद्यदि तदा चौरेणाहृतवस्तु दक्षिणाशा
विभागके निःक्षिप्तं पृथिवीगर्भे फलमेवं हि संदिशेत् अथवा शकलं तत्तु फराख्यं ॥ यदि जायते तदा चौरेणाहृतवस्तु पश्चिमा
शाविभागके उत्स्थाने क्षितिगर्भे वा स्थापितं स्यान्न संशयः अथवा तत्तु शकलं वयाजाख्यं ॥ भवेद्यदि तदा चौरेणाहृतवस्तु सौ

CC 0- Jangamwadi Math Collection. Digitized by eGangotri

तस्करेणफलमेतद्धि निर्दिशेत् अथवाषष्टकस्थानेयद्यइ कीशं ॥ समागतंकांतिचिक्किलाविशेषश्चमणिश्यामोहिईरि
तः आरक्तंकुसुमञ्चैवलोहंसीसंतथैवच तदानीतंतस्करेणफलमेतद्धि निर्दिशेत् अथवाषष्टकस्थानेहुमरा ॥ शकलंभ
वेत् तदामाणिक्यजातंचेद्रत्नपाषाणकंचवा रक्तमृणमयपात्रंचशुक्लकाचंतथैवच लोहजातास्रजावापिचतुष्कोणप्र
पाटिका तदाचौरेणानीतेतिफलमेतद्धि निर्दिशेत् अथवाषष्टकस्थानेवयाजं ॥ शकलंभवेत् बिल्लोरकंमौक्तिकंचैवमुक्ता
शुक्तिस्तथैवच लवणंवरानागौचकंचुकः कागलस्तथा अथवाषष्टकस्थानेतुसत्तवारिजकं ॥ भवेत् वज्रंचैवचरत्नंचप्र
वालन्चपरंतथा हरितालकश्चकर्पूरः सुवर्णमुद्रिकातथा मृद्गोलमृत्तिकापात्रंनीतंचौरेणनिर्दिशेत् अथवाषष्टक
स्थानेतुसहाखिलकं ॥ भवेत् विशिष्टंमौक्तिकंचैवप्रवालश्चविलोरकं स्वस्तिकाहयवेशानंतथैवचहसंतिकातथाणि
वसनंचैवपट्टवस्त्रंतथैवच नीलकाहयकंवस्त्रंवंगारोप्यंतथैवच तद्रौप्यंमुद्रिकाकारंनीतंचौरेणसंदिशेत् अथवाषष्टक
स्थानेचात्तवेखारिजंभवेत् ॥ मृद्दालोष्टतिकापात्रंसूतक्तूताचप्रपाटिकालोहंचैवतुसूचीचनीतंचौरेणनिर्दिशेत् अथ
वाषष्टकस्थानेनकौयलखरंभवेत् ॥ काचकूपीवतास्थ्रताम्रंचैवतुपित्तलं नीतंचौरेणविज्ञेयंयथाहयवनःपुरा अथवा
षष्टकस्थानेचात्तवेदाखिलं ॥ भवेत् विशिष्टंमौक्तिकंचैवप्रवालंचतथैवच मुक्ताशुक्तिःशतद्वस्तुप्राचीदिग्भागकेशुभे

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

अन्यागारेथवाशून्यगृहे मूत्रपुरीषयोः स्थापितं चेति विज्ञेयं रमलेशास्त्रानुसारतः अथवा तत्तुशकलेनुस्त्रत्तखारिजं ॥ कंभ
वेत्तत्तदा चौरे राततद्वस्तु प्राचीदिग्भागके शुभे अन्यागारेथवा मार्गमध्ये चैव महानसे चुल्लीभस्मनि निःक्षिप्तमिति तत्र फ
लं दृशितत्तकस्य हस्तेन चौरस्य धारणं वै भविष्यति इति प्रश्ने कृते तत्र रमलं च विलोकयेत् तत्रापि दशमस्थाने यत्नेन प्रविलो
कयेत् दशमस्थानसंस्थं तु शकलं यद्भविष्यति फलं तदनुसारेणावक्तव्यं च मनीषिभिः यदि स्याद्दशमस्थाने लह्यानं ॥
शकलं शुभं तदा तु पृच्छकस्यैव रस्त्रयं वै धारयिष्यति अथवा दशमस्थाने कब्जुद्दाखिल ॥ कं भवेत् तदा तु पृच्छकस्येह मि
त्रं वा वस्तुस्त्रकः धारयिष्यति तं चौरं हीत्याह यवनः पुरा अथवा दशमस्थाने जमातं ॥ शकलं भवेत् पृच्छकस्यापि ताय
हा पितृव्यस्तस्करं ध्रुवं धारयिष्यति यत्नेन नात्र कार्या विचारणा अथवा दशमस्थाने कब्जुत्तखारिजसंज्ञितं ॥ शकलं य
दि भावेत्तदा तत्र फलं दृशिनं बन्धुश्च भगिनी वा पितृव्येश्मनिकटे गृहात् पृच्छकस्यैव विज्ञेयं धारयिष्यति तत्स्करं अथ
वा दशमस्थाने फराख्यं ॥ शकलं भवेत् पृच्छकस्य सुतो वापि प्रेमपात्रं तु तस्करः धारयिष्यति तं चौरमित्याह यवनः पुरा
अथवा दशमस्थाने उक्लाख्यं ॥ शकलं भवेत् पृच्छकस्य तदा दासदासीपुत्रश्च वै ध्रुवं धारयिष्यति तं चौरमित्याह यवनः
पुरा अथवा दशमस्थाने भवेदंकीशसंज्ञितं ॥ पृच्छकस्य तदा शत्रुर्विभागी वा विलासिनी धारयिष्यति तं चौरं नात्र कार्या

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

रणा अथवा दशमस्थाने वृयाजं ३ शकलं भवेत् शास्त्रज्ञः परिहृतो वापि पांथस्तीर्थनिषेविकः धारयिष्यति तं चोरमित्याहय
वनः पुरा अथवा दशमस्थाने तु सत्तवारिजं ३ कं भवेत् तदा संधारयेच्चौरं पृच्छकः स्वयमेव हि अथवा दशमस्थाने ह्यातवेदाखि
लं ३ भवेत् सुहृदः पृच्छकस्यैव धारयिष्यति तस्करं अथवा दशमस्थाने इज्तिमाया ३ ह्वयं भवेत् तदा पृच्छकदायादस्तस्करं
धारयिष्यति अथवा दशमस्थाने तरीकं ३ शकलं भवेत् तदा पृच्छकमित्रारिणादायादानस्तथैव च तस्करं धारयिष्यति नात्र
कार्याविचारणा अथवा दशमस्थाने तु स्वहारिवलकं ३ भवेत् तदा पृच्छकमित्रारिणतस्याप्ताः सेवकास्तु वा तस्करं धारयि
ष्यंति यथाह यवनः पुरा आगमिष्यति वै चौरो नागमिष्यति चेति वै पृच्छके नकृते प्रश्ने समलं च विलोकयेत् प्रथमे भव।
ने पूर्वमिस्तखारिजकं भवेत् मुस्तखारिजकं वापि सप्तमं शकलं च यत् एतयोर्योगतः कार्यमन्यच्छकलमुत्तमम् उत्पन्नं
शकलं यत्तु तच्चेद्दाखिलकं भवेत् आगमिष्यति वै चौरस्तदेति फलमादिशेत् अथवा खारिजं चेत्स्यान्नागमिष्यति वै तदा
मुन्कलीवं तदा तत्तु शकलं जायते ध्रुवं तदा कदाचिद्दायाति कदाचिन्नेति संदिशेत् सावितं चेद्भवेत्तत्तु नागच्छति च किंतो भ
वेत्तगंतव्यं वानुगंतव्यमिति चेति करोति च तत्रापि सौस्यसावीतं यद्दिस्याच्छकलं हि तत् तदा चोरः कदाप्येवं नागमिष्य
ति निर्दिशेत् तस्कराः कति संतीति कृते प्रश्ने विलोकयेत् सप्तमस्थानकं यत्तु तत्रयच्छकलं भवेत् पुनरावृत्तिरेतस्य कतिस्थ।

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰ ६५ निषुविद्यते अथवा पुनरावृत्तिर्नभविष्यति चेत्तदा एकाकी तु तदा चौर इति तत्र फलं दिशेत् कस्मिन्स्थाने तु चौरेण स्थापितं व
स्तुजातकं इति प्रश्ने कृते तत्र रमलं च विलोकयेत् चतुर्थस्थानकं यत्तु तत्र यच्छकलं भवेत् स्थानं तदनुमानेन वक्तव्यं च विशे
षतः तथैव पंचमस्थाने साक्षित्वे प्रविलोकयेत् तस्मात्सत्यं भवत्येव फलं पूर्वोक्तमेव च किं वस्तु कः पदार्थश्च नीतश्चौरेण।
निश्चितं इति प्रश्ने कृते तत्र रमलं च विलोकयेत् तत्रापि षष्टकस्थाने शकलं यद्भविष्यति फलं तदनुसारेण वक्तव्यं च मनीषि
भिः षष्टकस्थाने शकलं लह्यानाख्यं ⁝ भवेद्यदि तदा तु पद्मरागश्च रत्नविद्रुममेव च हरितालो लाजवर्तः काचकूपी तथैव
च सुवर्णं चैव रौप्यं च नीतं चौरेण निश्चितं अथवा षष्टकस्थाने कब्जदाखिलकं ⁝ भवेत् श्वेतांजनं गंधकश्च तथैव च मनःशि
लाद्रव्यादिकं तदा तत्स्वतस्करेण विनिर्दिशेत् अथवा षष्टकस्थाने कब्जुलखारिजकं ⁝ भवेत् हरितालो गंधकश्च ताम्रं सीसं
च लोहकं नीतं च तस्करेणेति तदा तत्र फलं दिशेत् अथवा षष्टकस्थाने जमातं ⁝ शकलं भवेत् जवाहरजरदा मणिः काच
कूपी तथैव च पेरोजाख्यमणिश्चैव पाषाणा हेममणिस्तथा पारदश्चैव सीसं च नीतं चौरेण निर्दिशेत् अथवा षष्टकस्थाने
फराख्यं ⁝ शकलं भवेत् मुक्ताफलं च माणिक्यं मुक्ताशुक्तिस्तथैव च रौप्यं चैव तदा नीतं तस्करेणेति निर्दिशेत् अथवा ष ६५
ष्टकस्थाने उक्लाख्यं ⁝ शकलं भवेत् तदा तु हारशृंगं च सीसं लोहं तथैव च लोहकुक्लं च पाषाणं विशेषमणिमेव च तदानी

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

म्यदिग्भागके शुभे हरितस्थानके यद्वा स्मशानीयस्थले तु वा गोपितं चेति विज्ञेयं समलं शास्त्रकोविदैः अथवा नतु शकलं कद्रु
दास्विलकं ॥ भवेन्न तदा चौरेणानहृस्तु दक्षिणाशा विभागके निःक्षिप्तं पृथिवीगर्भे फलमेव मुदीरयेत् इज्जिमायाहृयं चैव
शकलं यदि तज्ज्ञवेत् ॥ तदा चौरेणानहृस्तु पश्चिमाशास्मशानके म्लेच्छदेवालये वा पि यत्र स्थाने तथैव च क्षत्वा संपुटके चैव।
स्थापितं चेति संदिशेत् अथवा नतु शकलं ह्यानवेरवारिजं ॥ भवेन्न तदा चौरेणानहृस्तु हस्तिशाला तथैव च वृषशालास्थले
चैव तथा ष्ट्रस्थानके पि च प्राच्यां दिशायां निहितमिति तत्र फलं दिशेत् अथवा नतु शकलमानवेदास्विलं ॥ भवेन्न तदा चौरे
णानहृस्तु दक्षिणाशा विभागके आरामादिस्थले चैव निःक्षिप्तमिति संदिशेत् अथवा नतु शकलं नु स्वहास्विलकं ॥ भवेन्न तदा
चौरेणानहृस्तु सौम्यदिग्भागके शुभे महामार्गस्य मध्ये वा हरितस्थानके शुभे निक्षिप्तं पृथिवीगर्भे फलमेवं समादिशेत् अ
थवा शकलं नतु तरीकाख्यं ॥ भवेद्यदि तदा चौरेणानहृस्तु प्राच्यां दिशि विनिर्दिशेत् श्रेष्ठस्थाने मार्गमध्ये निःक्षिप्तं धरणी
तले अथवा नतु शकलं नकीयलखदं ॥ भवेन्न तदा चौरेणानहृस्तु सौम्यदिग्भागके पुवसमीपे पादपस्येह हरितस्थानके शु
भे स्थापितं चेति विज्ञेयं समलं शास्त्रकोविदैः अथवा नतु शकलं लह्याशाख्यं ॥ भवेद्यदि तदा चौरेणानहृस्तु प्राचीदिग्भागके
शुभे म्लेच्छदेवालयस्यापि समीपे न तथैव च स्थापितं चेति विज्ञेयं समलं शास्त्रकोविदैः अथवा नतु शकलं कज्ञातवारिजं ॥ के

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰ ६६ भवेत्ततदाचौरकाचकूपीपाषाणंचविलोचकं अथवाषष्टकस्थानेभवेद्दिक्तिमायकं ॥ रत्नंमणिविशेषश्चनीलःपारोजक

त्तथापारदश्चैवरौप्यंचगागालश्चतथैवचनीतंचौरणवक्तव्यंयथाहयवनःपुरा अथवाषष्टकस्थानेतरीकं ॥ शकलंभवेत्त वि

लोरकंचरौप्यंचपारदंवस्त्रमेवच सूत्ररज्ज्वादिकंचैवकागलश्चतथैवच नीतंचैनस्करेणेतिफलंतत्रविनिर्दिशेत्त अष्टमस्थान

शकलाद्वस्तुरूपंविनिर्दिशेत्त प्रत्यक्षजनसंघेस्मिन्कश्चौरइतिचेद्वदेत्त नरास्तुनगरंयातंचतुर्थेकारयेत्पृथक् चतुर्दिक्षुसभाका

र्यांततस्तुरमलंचरेत्त एतस्यांतुदिशायांचतस्करोवर्ततेनवा इतिचेत्तिसमाधायचालयेत्पाशयुग्मकं ततस्तुरमलंकृत्वास

म्यक्तत्रविलोकयेत्त तस्मात्त्रयोदशस्थानेशाखिलंचेत्समागतं तदातस्यांसभायांतुतस्करोवर्ततेध्रुवं अनेनैवप्रकारेणचतुर्दि

क्षुपृथक्पृथक् रमलंजनयेद्विद्वान्कृत्वातत्रविचेतनं तत्राप्येवंसभायाश्चचतुर्द्वारंतुकारयेत्त पृथग्दिक्षुसमास्थाप्यपूर्ववद्रम

लंचरेत्त इत्थंयावत्तस्करस्यप्राप्तिःस्यात्तावदेवहि कर्तव्यंचप्रयत्नेनवारंवारंतथैवपुनः एतस्मिन्विषयेप्रश्नचमतमन्यद्ब्रवीम्यहं पू

र्ववच्छकलंकृत्वाकुर्याद्रमलमुत्तमं पुनस्तत्रापिरमलेप्रथमंशकलंतुयत्त द्वितीयंनवमंचैवतथैवचत्रयोदशं एतेषामग्नि

बिंदूनांकार्यंशकलमुत्तमं पुनस्तत्रैवरमलेतृतीयंशकलंतुयत्त दशमेकादशंचैवतथापंचदशंचवै एतेषांशकलानांचपा

र्थिवाबिंदवश्चये तैरन्यच्छकलंकार्यंतद्द्वितीयंनिगद्यते पुनस्तत्रैवरमलेचतुर्थंशकलंतुयत्त षष्ठंचपंचमंचैवतथाषोडशकं

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

लसुत्तमं तृतीयं शकलं चेत् द्दमले निश्चितं ज्ञातं पुनस्तथैव समलं सप्तमं शकलं तु यत् अष्टमं द्वादशं चैव तथैव च चतुर्दशं एतेषां
वायुविहूनां कार्यं शकलं सुत्तमं एतच्चतुर्थं शकलं ज्ञेयं समलं को विदुः शकलानां चतुष्केऽस्मिन् सुक्षिप्ते निजे गृहे यत्किंचिच्छ
कलं चेत्स्यात्तदा तद्विशितस्करः एवं पुनः पुनः कार्यं यावच्चौरस्य लभ्यते एतस्य रोगिरोगो रोगः कोऽस्तीति यदि पृच्छति तदा तु सम
लं कार्यं द्रष्टव्यं च प्रयत्नतः तत्रापि षष्ठकस्थाने ह्याग्नेयं शकलं भवेत् तदा पित्तोद्भवो रोगो दाहश्च सुतरां भवेत् अथवा षष्ठक
स्थाने शकलं वायवीयकं तदा तु वातरोगः स्याद्भूतदृष्टिस्तथैव च अभिचारोद्भवो रोगः श्लेष्मकश्चेति निर्दिशेत् अथवा षष्ठकस्था
ने यदाप्यं शकलं भवेत् कफोद्भवस्तदा रोगः स्नेह्यरोगस्तथैव च अथवा षष्ठकस्थाने पार्थिवं शकलं भवेत् तदा रुधिररोगश्च त
थाचैवास्थिभग्नता त्वगंतर्गतमेवास्ति सप्तचैव सुदर्शं अथवा षष्ठकस्थाने लद्दाराणं शकलं भवेत् पित्तोद्भवस्तदा रोगः
शिरोरुग्वधिरामयः ज्वरो दाहश्च तृष्णा च मात्रभेदस्तथैव च गुरुवासरपर्यंतं कष्टमेतस्य वर्त्तते अथवा षष्ठकस्थाने कज्ज
दारिकलं मागतं तदा तु पैत्यरोगश्च वातरोगस्तथैव च कराठमन्यमयश्चैव तथैवात्र निगद्यते रविवासरपर्यंतं कष्टं तस्य
विनिर्दिशेत् अथवा षष्ठकस्थाने कज्जलत्वाख्यं मागतं कफोद्भूतस्तदा रोगस्तथा पित्तोद्भवश्चवै हृद्रोगः पार्श्वदृष्याचै
व चिंता वा मानसी व्यथा कश्चिद्दिवार्त्तो रोग इति तत्र फलं दिशेत् शनिवासरपर्यंतं कष्टं तस्य विनिर्दिशेत् अथवा षष्ठ

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र.सि.
६७

कस्थाने जमातं ॥ शकलं भवेत् तदा शरीरे रौरुस्थं च वातव्याधिस्तथैव च तमकश्च ज्वरश्चैव नाभिरुज्जरस्व्यथा बुधवासरपा
र्यंतं तस्य कष्टं विनिर्दिशेत् अथवा षष्ठकस्थाने फराख्यं ॥ शकलं भवेत् अशक्तानि च नित्येन तदा रोगः प्रजायते वातोन्मा
दो भूतबाधा चाभिचारोद्भवातुरक्तं चेटकोद्भवरोगश्च शिरोरुक्पृष्ठरुक् तथा भृगुवासरपर्यंतं तस्य कष्टं विनिर्दिशेत् अथ
वा षष्टकस्थाने उल्काख्यं ॥ शकलं भवेत् तदा रक्तविकारश्च शरीरे रौरुस्यता भवेत् उच्चस्थानाच्च पतनं पाषाणाद्यं तनोपि
वा काष्टघातेन वा रोगो इष्टिकाघातनोपि वा शनिवासरपर्यंतं तस्य कष्टं विनिर्दिशेत् अंकीश ॥ शकलं यदा षष्टस्थान
गतं भवेत् तदा स्थितिस्थितो रोगः पैत्यरोगस्तथैव च अंगमर्दश्च भवति शन्यंतं कष्टता भवेत् अथवा षष्टकस्थाने हुमरा ॥
शकलं भवेत् तदा स्तंहि शारीरं तथा शस्त्रकृतं स्रतं रुधिरस्य विकारश्च जठरांतं भवेद्ध्रुवं भौमवासरपर्यंतं तस्य कष्टं वि
निर्दिशेत् अथवा षष्टकस्थाने वयाजं ॥ शकलं भवेत् कफोद्भूतस्तथा रोगः शीतरोगस्तथैव च सोमवासरपर्यंतं तस्य
कष्टं विनिर्दिशेत् अथवा षष्टकस्थाने नुस्रतवारिज ॥ मागतं तदा ज्वरस्य दाहश्च प्रतापश्च विदेहता अभिचाराद्यभिहि
तानयारुधिरविष्कृतिः नेत्ररोगश्च भवति तत्कष्टं भास्करावधि अथवा षष्टकस्थाने नुस्रहाविल ॥ मागतं कफोद्भूतस्त
दा रोगो वातरोगस्तथैव च कटिमूलं वातशूलं कफवातोद्भवा व्यथा गुरुवासरपर्यंतं तत्कष्टं हि विनिर्दिशेत् आतवेस्वा

श्रीरामः ६७

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

स्थानगतंभवेत् तेजोहानिस्तदातस्यकृत्रिमाद्विषतश्चरुक् भूतबाधाचेष्टुकादिरोगोजठरस्तभवेत् शनिवासरपर्यंतंतस्य।
कष्टंविनिर्दिशेत् अथवाषष्टकस्थानेनक्रीयलस्वदं॥ भवेत् तदारक्तविकारःस्याज्ज्वरेकशीरुतथा। याम्सासर्वशरीरस्य
कृत्रिमाद्विषतश्चरुक्रोगस्याचिरकालेनप्रमेहोरोगपीडितः भौमवासरपर्यंतंतस्यकष्टंविनिर्दिशेत् अथवाषष्टक।
स्थानेह्यातवेद्राखिलं॥ भवेत् तदातुवायुरोगस्यात्तथाप्रेमनिमि ततः चिंतायारोगउत्पद्यतथाभोगस्यचिंतयाशीतज्व
रश्चभवतितत्कष्टंभास्करावधिः॥ जितमायक॥ सतंवाषष्टस्थानगतंभवेत् तदारक्ताभिघातश्चचेटकंचध्रुवंभवेत् सन्नां
गोषुभ,,वेच्छूलंशोकंस्यात्दुरे ध्रुवंबुधवासरपर्यंततस्यकष्टंविनिर्दिशेत् अथवाषष्टकस्थानेतरोकं॥शाकलंभवेत् तदातु
शीर्षरोगश्चवैकलपस्तदातथाभूयाद्भूतस्यचतथाकफरोगस्तथैवचमंदोदरंभवेत्तस्ययद्वास्याच्चप्रवाहिकासोमवा
सरपर्यंतंकष्टंतस्यविनिर्दिशेत् आरोग्यंरोगिणोभूयान्नवेतियदिपृच्छकः तदातुरसलंकुर्यादिष्टव्यंचप्रयत्नतः संब
न्धःप्रथमेस्थानेरोगिणाश्चैववर्तते षष्टस्थानस्यसंबंधोरोगस्यैवहिवर्तते द्वितीयस्थानसंबंधोभेषजस्यहिवर्तते दश
मस्थानसंबंधोवैद्यस्यैवहिवर्तते आरोग्यस्यचसंबंधस्तथैवकादशेगृहे अष्टमस्थानसंबंधोमृत्युनावर्तते ध्रुवंद्वादश
स्थानसंबंधश्चिरस्थायीरुजोभवेत् अपस्मारंचकुष्ठंचहृद्रोगःक्षयकामलेदुर्नामग्रहणीत्याद्याइष्टव्याद्वादशेगृहेस्था

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र० सि० ९८

नेष्वेतेषु चेत्सौम्यं खारिजं शकलं भवेत् यद्यसौम्यं मुन्कलीवं स्थानेष्वेतेषु जायते आरोग्यं तु तदा स्याद्दै रोगिणाश्चेति निर्दि-
शेत् यद्यस्थानेषु चैतेषु उत्काराख्यं शकलं भवेत् जमातं च वयाजं च नकीयलखंदं तथाहुमराख्यं च शकलं तथै-
वेजितमायकं तरीकां नवखारंजे कब्बुतवारिजं कं चैव तदा तु रोगिणो मृत्युर्निश्चितं स्यान्न संशयः उत्काकारः समुद्दि-
ष्टो यथा प्रेतोर्ध्ववेदिका आतेनिगतमस्ताथज्जमाताकारः समुच्यते वयाजाकारः समुद्दिष्टो यथा प्रेतस्य चाशुकं नकीयल
खदाकारो भवेद्धुगर्तकाखत इज्तमाय स्वरूपं तु प्रेतस्ज्जानतृतीयस्तथाहुमराकारः समुद्दिष्टः काककोलाहलो यथा
तरीकाकारः समुद्दिष्टः प्रेतस्य स्तानकाखत आतवेखारिजाकारो यथा वल्लिखनेधुनाय यथा प्रेतस्य वनिता मुक्तकेशा रुदं-
ति हि तथान्येपि यथा तद्धुत्स्वरूपं निर्दिशेद्बुधः कब्बुतवारिजः रूपं तु श्मशानास्थीति वद्भवेत् अन्यच्च नवमस्थाने तरीकं
शकलं भवेत् वयाजं षष्ठकस्थाने उत्काराख्यं चाष्टमे गृहे इज्तिमायाह्वयं चैव षदिस्याद्द्वादशे गृहे अंकीशाख्यं च श-
कलं चतुर्थस्थानकं भवेत् आतवेखारिजं चैव तथैवैकादशे गृहे जमातं प्रथमस्थाने हुमरा दशमे भवेत् एषु स्थानेषु
चैतानि संपूर्णफलदान्यपि प्रथमात्षष्ठकाद्दोचकार्ये शकलमुत्तमं चतुर्थाद्दशमाच्चैव कार्ये शकलमुत्तमं एतयोरुभ-
योर्येमात्कार्ये शकलमुत्तमं एतस्माच्छुकलाच्चैव फलं वाच्यं मनीषिभिः एतद्दृत्पन्नशकलं लह्याणाख्यं भवेद्य-

९८

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

वेत् तदाशीघ्रतरं तस्यरोगानिर्मुक्तताभवेत् अथवातत्तुशकलंतुस्तहाखिलकं ३ भवेत् कज्जहाखिलकं २ चैवतथैवातवरा
खिलं ३ तदारोग्यंतुकतिचिद्दासरानन्तरंभवेत् अथवातत्तुशकलंवयाजाख्यं ३ भवेद्यदि इज्जमाया ३ हवयंवापिजमा
ताख्यं ३ भवेच्चवातदातुचिरकालेनरोगानिर्मुक्तताभवेत् अथवातत्तुशकलंकज्जतवारिजकं ३ भवेत् आतवेरवारिजं ३
वापित्तदाकस्मान्मृतिर्भवेत् अथवातत्तुशकलमंकीशाख्यं ३ यदाभवेत् उक्ताख्यं ३ हुमरा ३ हवं चचिरोगास्यान्मृतिस्तदा
अथवातत्तुशकलंतरीका ३ ख्यंभवेद्यदिनकीयलखवं ३ वापिशकलंतद्भविष्यति एतयोः साह्निशकलंसौम्यंचेदा
गमिष्यतितदासन्नमृतिर्भूत्वापुनर्जीवतिनिश्चितम् एतयोः साक्षिशकलंक्रूरंचेत्संभविष्यतितदारोरवस्यतांप्राप्यततः
पश्चान्मरिष्यतिदासानांचैवदासीनांप्रश्नश्चेत्क्रियतेशुभः तदातुरमलंविद्वान्कुर्याच्चैवप्रयत्नतः प्रथमाद्द्वादशाच्चैव।
शकलंकार्यमुत्तमं द्वितीयात्षष्ठकाच्चैवकार्यंशकलमुत्तमं एतयोरुभयोर्योगाच्छकलंकार्यमुत्तमं एतस्माच्छकला
च्चैवफलंसर्वंसमादिशेत् तच्चेत्तुस्तहाखीलं ३ मातवेदाखिलंतथा ३ कज्जहाखिलकं २ चैववयाजाख्यं ३ तथैवचइज्ज
माया ३ हवयंचैवशकलंसंभविष्यतितदादासीदासगणाः स्थिरपादाः शुभावहाः अथवातत्तुशकलंलह्याराणाख्यं ३ भवे
द्यदितुस्तवारिजकं ३ वापिफराख्यंवा २ भविष्यतितदादासीदासगणाः शुभः स्याच्छुभदायकः परंतुस्वामिचिंतेन

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰ ६९

विक्रयश्चभविष्यतिअथवातत्तुशकलंहुल्लाख्यं⁝संभविष्यतिनकीयलखदं⁝वापितयातत्रफलंदिशेत्दासीदासा
मरिष्यंतिगमिष्यंतिचवाततःअथवातत्तुशकलंतरीकाख्यं⁝भविष्यतियद्वाकब्जलखारीजं⁝तदातत्रफलंदिशेत्दासीदा
सास्वरपदामिथ्यावादिनएवचअथवातत्तुशकलंहुमरा⁝वांकिशं⁝भवेत्दासीदासस्तदासर्वेमरिष्यंतिचरोगतःअथवा
तत्तुशकलमातवेखारिजं⁝भवेत्दासीपुत्रस्तदाचेत्स्यात्परनिंदापरायणाःमिथ्यावादीद्यूतकारीव्यभिचारीचैवभवेत्अ
थवाचेद्भवेद्दासीतदास्याद्व्यभिचारिणीइत्याशक्ताप्रपंचाढ्यापलायनपराभवेत्अथवातत्तुशकलंजमाता⁝ख्यंभवेद्यदि
तदास्थिरातदासेयापरंतुव्यभिचारिणीप्रपंचकारिणीचैवबहुधासंभविष्यतिकाजातिःसेवकस्यास्येत्येवंपृच्छतिपृच्छकः
षष्ठुकाद्वादशास्त्वेवशकलंकार्यमुत्तमंतस्मात्सर्वंफलंवाच्यमित्याहयवनःपुरातच्चेत्पंकीश⁝कंजाततदावर्वरजातिग
तच्चेदल्ला⁝ह्यंजाततदाईरीस्त्वःससेवकःतच्चेन्नकीयलखदं⁝तदाहमीतिनिर्दिशेत्तच्चेदातवखारीजं⁝तदागुर्ज्यस्ति
सेवकःतच्चेत्फरहा⁝जाततदाऽऽर्थेन्यस्तिसेवकःतच्चेत्तरीक⁝माख्यातंफिरंगीस्यात्तदाहिसःहुमरा⁝ह्वंभवेत्चेत्तदागु ६९
रायस्तिसेवकःयद्वाखताषिजातिःस्यादित्याहयवनःपुरातच्चेत्कब्जलखारीजं⁝तदाजंग्यस्तिसेवकःअथवापूर्वदिक्स
स्थसेवकोस्तीतिनिर्दिशेत्अथवैतेषुनवसुशकलंस्यान्नकिंचनतदादासस्तुनभवेद्भवेद्वृत्तमजातिकःकेनचित्कपटेनैव॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

तोदासद्दृतीरयेत्तत्देवचेज्ज्ञमातंस्यात्तदैतत्तुविनिश्चितं अ ज्ञाष्याद्दिचतुष्यात्सुमेलाभोवर्त्तेनेनवाइतितत्त्वकृतेप्रश्नेरमलं
तुविलोकयेत्तप्रथमात्तषष्ठकान्नैवशकलंकार्यमुत्तमंतस्मात्सर्वफलंवाच्यंमित्याहयवनःपुराएतच्छकलकंचेत्स्यात्तुसु
दृशविल ः संज्ञितंकज्जदाविलकं ः वापितथैवातवदाविलं ः तदालाभोभवेन्नूनंमवंतुवहुशोभवेत्त अथवाशकलंतत्तु
जमातारव्यं ः भवेद्यदिइज्जमायक ः संज्ञंवावयाजारव्यं ः भविष्यतितदायद्यस्तितच्चास्तिवहुशोनभवेत्किल अथवा
तत्तुशकलंलह्याणारव्यं ः भवेद्यदिनुस्तत्तवारिजकं ः चैवफरहारव्यंभवेद्यदितदाशुभावहंतत्स्यात्पदंतहिक्रमोभवेत्तं
अथवातत्तुशकलंहुमरारव्यं ः भवेद्यदिउल्कारव्यं ः शकलंचैवतथाकज्जलरवारिजं ः आतवेरवारिजं ः चैवभवेतच्छक
लंहिचेत्ततदामृत्युमवाप्नोतियद्वातद्धानिरेवच अथवातत्तुशकलंनकीयलरवद ः भवेत्तनरीकं ः वाभवेत्तत्तुतदानष्टंहतंभ
वेत अथवानत्तुशकलंमंकोशारव्यं ः भवेद्यदितदारोगेणामरणंनिर्दिशेत्सचतुष्पदः वाजोजुराचशहिनिसिकुरब्बकहृतारं
कीरवसाइकेताद्याःपक्षिणः समुदीरिताः एतेषांपक्षिणांप्रश्नेरमलंचविलोकयेत अत्रापिपक्षिणांप्रश्नेप्रश्नद्वयमु
दीरितंऊहुनकारणंयेषांतेषांचैवसुपक्षिणां एकप्रश्नः समुद्दिष्टस्तेचाप्यत्रसमीरिताः वाजोज्जुराचशहिनिसिकतत्र
कहृतारंउड्डानकारिणाएतेपक्षिणःसमुदीरिताः वाचैवकारणंयेषांपक्षिणांसमुदीरितंतेषांद्वितीयःसंप्रश्नःकथितो

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

ए॰सि॰
७०

यवनैः पुरा कुलंकेकुकुटाद्याश्च येचान्येवाविलासिनः एतत्प्रश्नद्वयंप्रोक्तंयवनैर्दैवकोविदैः एतत्प्रश्नद्वयेवापि स्मलंहिवि
लोकयेत् तत्रापिप्रथमंस्थानंषट्कंचविलोकयेत् एतत्स्थानद्वयेचेत्स्यात्सौम्यंशकलमुत्तमं तदालाभोभवेन्नूनंतत्पक्षि
विषयस्यच उड्डानकारणंयेषांपक्षिणांकथितंपुरा तेषांप्रश्नेकृतेतत्र स्मलंहिविलोकयेत् प्रथमात्षट्कान्वैवद्वितीयाद्द
शमात्तथा उत्पन्नशकलेकार्येताभ्यामेकंतुकारयेत् तस्मात्सर्वंफलंवाच्यमित्याहयवनः पुरा लद्याणंतुसत्वारीजं।
फराहंशकलंतथा ॥ ततउड्डानंकरिष्यंतितदाचित्रंभविष्यति अथवातत्तुशकलंनुस्रहाखिलकंभवेत् कंजहाखिलकं
वापितथैवातवराखिलं ॥ तदातुमृगयानूनंसुबुद्धाचभविष्यति लाभश्चैवभवेन्नूनंनात्रकार्याविचारणा अथवातत्तुश
कलंजमातारव्यंभवेद्यदि जमातंचेज्जिमायंवातदातत्रफलंदिशेत् ॥ ततउड्डानंकरिष्यंतिस्वल्पास्यान्मृगयातदा परंतु
सुखरूपेणपक्षिणामागमोभवेत् अथवातत्तुशकलमातवेसवारिजंभवेत् नकीयलखवंवापितथोल्लारव्यंभविष्यति त
याकज्जलखारीजं ॥ तदातत्रफलंदिशेत् भविष्यंतितदानष्टाः पक्षिणः सर्वएवहि पुनर्नैवहिदृष्टाः स्युरित्याहयवनः पु
रा अथवातत्तुशकलमंकीशारव्यं ॥ भविष्यतिहुमराहं ॥ भवेद्वापितदातत्रफलंदिशेत् रोगेणपक्षिणश्चैतेमरिष्यंतीति
निर्दिशेत् अथवातत्तुशकलंतरीकाः रव्यंभवेद्यदितदातु पक्षिणोभव्यामृगयाकारिणश्चवै परंतुनेकदाचिच्चनष्टाः स्युः पक्षि

७०

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

प्येतेलभ्यास्युर्यत्नतस्त्वितिवाचैवकारणांयेषांतेषांप्रश्नेत्रगद्यतेतेचापिपक्षिणःसर्वेशुकाद्याःसारिकाद्यःयेषांवाणी
सुमधुरातेषांप्रश्नःपतत्रिणांक्रियमाणेतुसंप्रश्नेस्मलंतत्रकारयेतप्रथमान्नवमान्नैवतृतीयात्षष्टकात्तथाअपन्नेशकले
कार्येनयोरेकंतुकारयेततस्मात्सर्वफलंवाच्यमित्याहयवनःपुराततश्चच्छकलंजातंलहाणाख्यंशुभोदयंतुतहाखिलकं
चैवफणाहंशकलंतथाआतवेदाखिलंचैवतच्चच्छकलंकंभवेत॥ततोच्चखरमासाद्यवदंतिमधुरांगिरंअथवाततुशकलं
जमानाख्यंभवेद्यदिइजमायकसंज्ञंवावयाजंवातथैवच॥तदास्यात्तमधुरावाणीपंनीचखरीभवेत्अथवाततुशकलंनु
स्तवारिजकंभवेत्कज्जलाखिलकंवापितरीकाख्यं॥भवेद्यदिउच्चैःस्वरस्तदाभूयात्परंनमधुरंवचःअथवाततुशकलं
नकीयतलरवदंभवेत्उत्काख्यंशकलंवापिकज्जलवारिजकंतथा॥आतवेलवारिजंवापिशकलंतद्भवेद्यदिस्नानस्वरस्तदाभू
यान्मूर्खाःस्युःपक्षिणश्चतेअथवाततुशकलमंकीशाख्यंभवेद्यदिहुमराख्यंतुवाभूयात्तदातत्रफलंदिशेत॥रोगेणमरणंच
स्यान्मार्जारभक्षणंतथाअथवाततुशकलंकज्जलवारिजकंभवेतआतवलवारिजं॥वापितदातत्रफलंदिशेतउड्डीयपिंजरान्नू
नंगमिष्यंतिपतत्रिणः इतिषष्टकभवनअथसप्तमभवनंसप्तमंभवनंयत्तुतत्रप्रोच्यतेमयासप्तमेभवनेप्रश्नोविवाहग्रथ
नस्यचदायादानांतथान्नूनमन्योन्यमविभागिनांस्त्रीभिःशत्रुत्वकरणांविवादकलहादिकंसप्तमेभवनेज्ञेयंनात्रकार्याविचारणा

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰ ७१ विवाहार्थं पृच्छकेन कृतः प्रश्नो यदा भवेत् तदा तु समलंकुर्याद्यथाह यवनः पुरा प्रथमस्थानसम्बन्धो वरस्यैव हि वर्तते सप्तमस्था
नसंबंधो वध्वा एव हि वर्तते धनस्थानं वरस्यात्र द्वितीयं स्थानकं भवेत् अष्टमस्थानकं वध्वा धनस्थानं भवेद्ध्रुवं एतत्स्थानचतु-
ष्के तु सौम्यदाखिलकानि चेत् यद्वापि सौम्यसावीतसंज्ञानि शकलानि चेत् भविष्यति तदोद्वाहो निश्चितं स्याच्छुभावहः परं
तु प्रथमस्थाने सप्तमस्थानकेपि च द्रष्टव्यं शकलं यत्स्यात्तस्मात्सर्वं फलं दिशेत् प्रथमे सप्तमस्थानके कञ्जदाखिलकं भवेत् ॥ नु
स्रहाखिलकं ॥ वापि तथैवातवदाखिलं ॥ वयाजं ॥ वाजमातं ॥ वा तथैव जिमायकं ॥ तदोद्वाहो निश्चितं हि भविष्यति विनि
र्दिशेत् अथवा प्रथमस्थाने सप्तमस्थानके तथा लह्यारणं ॥ चांकीशं ॥ वापि तथा नुस्रतवारिजं ॥ भविष्यति तदा तत्र फलमेवं वि
निर्दिशेत् भवेदुद्वाहसामीप्यं परं तु न भविष्यति अथवा प्रथमे स्थाने सप्तमे स्थानकेपि च यदि स्यात्कञ्जवारीजं ॥ ह्वातवेरवा
रिजं ॥ तथा नकीयलखदं ॥ वापि हुमराख्यं तथैव च ॥ तदोद्वाहस्तु न भवेदित्याह यवनः पुरा अथवा सप्तमस्थाने प्रथमस्थान
के तथा उल्काख्यं ॥ शकलं चैव तरीकाख्यं ॥ च वा भवेत् फराख्यं ॥ शकलं वापि तदा तत्र फलं दिशेत् भवेन्निश्चितमुद्वाहः परं ७१
तस्य वियोगता ततस्तु वै स्त्रिया भर्तुः सुखं नास्तीति निर्दिशेत् अथवा प्रथमस्थाने सप्तमस्थानकेपि वा एकादशे तथा स्थाने श
कलं दाखिलं भवेत् तदोद्वाहो निश्चितं स्यादित्याह यवनः पुरा कथमस्याः स्त्रियः शीलमिति प्रश्ने कृते सति प्रथमात्सप्तमाच्चैव श

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

फलं

तस्मात्सर्वैर्वाच्यंस्त्रीशीलस्यविनिर्दिशेत्तच्चेत्तुशकलंजातंतुखड्गाखिलःसंज्ञितंकङ्कदाखिलकंःवापितथैवात
वदाखिलंःतदासास्त्रीभवेत्तुत्यक्तसमृद्धाभाग्यभोगिनीअथवातत्तुशकलंवयाजाख्यंःभविष्यतिजमातंःवेत्तिम
यंःवातदातत्रफलंदिशेत्स्थिरपादाभवेत्सास्त्रीसलज्जाचविशेषतःधनधान्यादिसंवृद्धिकारिणीस्यान्नसंशयःपरंतु
तत्रचेज्जातंजमातंःशकलेषुभंतदाकन्याबहुतराभविष्यंतिनसंशयःअथचेज्जातिमायाहंःतदापुत्रास्तुभूरिशःअथवा
तत्रवयाजाहंःकन्याःपुत्रास्तथासमाःअथवातत्तुशकलंलह्याणाख्यंःभवेद्यदियद्वातुखत्तखाणिजंःतदातत्रफलंदिशे
त्सास्त्रीस्वबुद्धिभावेनसर्वकार्यंकरोतिहिस्वयमेवसमस्तानांकार्याणांसिद्धिकारिणीस्वयमेवहिचाभिज्ञाभाग्यभोक्ता
तथैवचअथवातत्तुशकलंफराख्यंःचभविष्यतितरीकाख्यंःभवेद्यद्वातदातत्रफलंदिशेत्तदान्यपुरुषासक्ताभवेत्स्त्री
व्यभिचारिणीसदैवकामदेवस्यक्रीडाखेलनलालसाभर्तुराज्ञांविनाप्येषासदान्यगृहगामिनीअथवातत्तुशकलंहमराहंः
भविष्यतिनकीयलखदंःवापितदातत्रफलंदिशेत्भर्तुर्दीपकरीनित्यंसदाकलहकारिणीअथवातत्तुशकलंमुत्तोख्यंः
चेद्भविष्यतिकञ्जखारिजंःकंवापितदातत्रफलंदिशेत्सास्त्रीस्नानसुखीचैवनिर्बुद्धिःकुशलापिनभ्रमिष्टाचभवेन्नूनंभ
र्तुराज्ञाकरीनचपलायनपरानित्यमितितत्रफलंदिशेतअथवातत्तुशकलंभवेदातवखारिजंःभंहिद्देषिणीभर्तुःसदैवव्य

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र·सि· भिचारिणीअथवातत्तुशकलमंकोशाख्यं॥ भवेद्यदितदाभवेद्धिवाचालानित्यंकलहकारिणीचित्तमध्येवसेन्नित्यंवैरं
७२ तस्याविनिश्चितंअस्यास्त्रियःकथंरूपमितिप्रश्नेकृतेसति १ मलंतत्रकृत्वातुसम्यक्तत्रविलोकयेत्तत्रापिसप्तमस्थानेशक
लंयद्भविष्यतिरूपंतदनुरूपेणवक्तव्यंचमनीषिभिःसुजातिजेयदपिताभवेद्यद्यहाकुजातिजाइतिप्रश्नेकृतेतत्ररमलंचवि
लोकयेत्सप्तमाच्छकलाच्चैवतथैवचचतुर्दशात्उत्पन्नंशकलंकार्यंप्रयत्नेनमनीषिभिःतस्मादुत्पन्नशकलात्तथैवैका
दशात्पुनःशकलंकार्यंसमुत्पन्नंतस्ययःखेटकोभवेत्फलंतदनुसारेणवक्तव्यंचमनीषिभिःउत्पन्नंशकलंतत्तुलह्यानाख्यं
॥भवेद्यदिनस्तुहाखिलकंवापितदातत्रफलंदिशेत्विदुषांपंडितानांचसत्कर्मरतचेतसांतपस्विनांकुलेजातादयितेतिवि
निर्दिशेत्अथवातत्तुशकलंजमानाख्यभवेद्यदिइज्तमायक॥संज्ञंवातदातत्रफलंदिशेत्सर्वज्ञानांचैवद्यानांदैवज्ञानांक
लावतांलेखकानांगृहेजातादयितेतिविनिर्दिशेत्अथवातत्तुशकलंहुमराख्यंभवे॥द्यदिनकीयलखदं॥वापितदातत्र
फलंदिशेत्तस्करस्वामिनांचैवशूराणांचकुलेषुचकारागृहस्थितानांचकुलेजातेतिनिश्चितंअथवातत्तुशकलंवश ७२
जाख्यं॥भवेद्यदितरीकाख्यं॥भवेद्यद्वातदातत्रफलंदिशेत्धनिकानांचपांथानांकुलेवैचित्रकारिणांवस्त्राद[illegible]कानां
चकुलेजातेतिनिर्दिशेत्अथवातत्तुशकलंकब्रदाखिलकं॥भवेत्तुस्वतवारिजकं॥वापितदातत्रफलंदिशेत् … ीय

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

श्रेष्ठानां धनिनां तथा कुलेजाता च दयिता तदैतच्च फलं दिशेत् अथवा तत्तु शकलमुक्ताख्यं ॥ हि भविष्यति भवेदंकी [illegible] कं ॥
यद्वा तदा तच्च फलं दिशेत् कुलेजाता च नीचानां विष्टाकर्मकृतां तथा परजागृतकर्तॄणां तथा कुग्रामवासिनां कृषी [illegible] ला
सदने स्त्री जातेति विनिर्दिशेत् अथवा तत्तु शकलं कज्जखवारिजकं ॥ भवेत् अथवा तत्खवारीजं ॥ तदा तच्च फलं दिशेत् वेद्वा
ह्यकुलेजाता तथा जागृतिकारिणां लोहकर्मकृतां चैव नीचवंशोद्भवा भवेत् अथवा तत्तु शकलं फराख्यं ॥ हि भवेद्यदि तथै
वात्तवदाखीलं ॥ तदा तच्च फलं दिशेत् आरट्टानां कुलेजाता तथा रूपमवंशजा कुलपात्र कुलेजाता तथानेकैकभोगिनां द्वि
तीयस्त्री विचारेणाकृतः प्रश्नो यदा भवेत् तत्रापि प्रथमा स्त्री च द्वितीया वा सुखप्रदा इति प्रश्ने कृते तत्र समलं च विलोकयेत्
प्रथमात्सप्तमाच्चैव कार्यं शकलमुत्तमं एतच्छकलसंबंधः पूर्वस्त्री विषयो भवेत् द्वितीयादृष्टमाच्चैव शकलं कार्यमुत्त
मं एतच्छकलसंबंधो द्वितीयस्त्रीनिमित्तिकः एतच्छकलयुग्मे तु यत्सौम्यं शकलं भवेत् फलं तदनुसारेणा वक्तव्यं च वि
शेषतः पूर्वस्त्री विषयं सौम्यं यदि स्याच्छकलं शुभं तदा सौख्यं तत्सकाशादेवमेव द्वितीयके इयं स्त्री वर्त्तते सुतान्न वेति यदि
पृच्छति तदा तु सप्तमस्थानं द्रष्टव्यं च प्रयत्नतः सप्तमस्थानकं चेत्स्याच्छकलं सौम्यदा खिलं केंद्रस्थाने तु शकलं तदेव पु
नरागतं केंद्रस्थानसमीपे तु स्याद्दिने शकलं शुभं दा खिलं वा सावितं च यदि स्यात्तत्रैव पुनः न भवेद्युक्तदृष्टिश्च गुरुदृष्टिश्च

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰ सि॰
७३

विसभवेत् समलं तत्र शकलं हुमराख्यं ॥ भवेद्यदि तदा सा स्त्री सुमुक्ता स्यादन्यनैवेत्तिमात्तवम् अथवा तत्र समले शकलं हुमरा
ह्वयं ॥ न भवेद्दला हुं ॥ चतथैवांकीशकाह्वयं ॥ फराख्यं ॥ शकलं चैव सा क्षित्वेथ यदि ज्ञायते समस्थानके चैव खारिजश
कलं भवेत् चरं वा मुन्कलीवाख्यं यदि स्यात्सप्तमे गृहे तदा भुक्ता सा ज्ञेया वनिते ति विनिश्चितं अवरोधस्थिता चेयं वनिता
वर्त्तते न वा इति प्रश्ने कृते तत्र समलं च विलोकयेत् पंचमात्सप्तमात्स्वेव शकलं कार्यमुत्तमं न चेत् सौम्यं दाखिलं स्यात्सौम्य
सावितमेव वा तदावरोधसंस्था सा पवित्रा स्यान्न संशयः ॥ तदेव शकलं यद्वा सौम्यं खारिजकं भवेत् यद्वा सौम्य मुन्कलीवं
तदा तत्र फलं दिशेत् अवरोधस्थिता वापि कदाचित्परगा भवेत् अथवा तत्तु शकलं क्रूरं खारिजकं भवेत् क्रूरं वा मुन्क
लीवाख्यं तदा तत्र फलं दिशेत् तदावरोधसंस्थाने पवित्रा न भवेद्ध्रुवः अथवा तत्तु शकलं फराख्यं च भविष्यति ॥ तरीकं ॥
वा तदा तत्र विनिर्दिशेद्बुधः फलं तदा स्यात्स्वकीया सा चंचला चेष्टया युता विभागिनां कृते प्रश्ने समले तत्र वै लिखेत् अष्ट
मात् द्वशमाच्चैव समलं कार्यमुत्तमं एतदुत्पन्नशकलाद्द्वितीयशकलात्तथा उत्पन्नं शकलं कार्यं ततः सर्वफलं दिशेत् यदि
स्यात्तत्तु शकलं सौम्यं दाखिलसंज्ञितं सौम्यसावितकं चैव तदा तत्र फलं दिशेत् स्वरूपस्तु तदा भागः पवित्रश्चोद्यमो भवे
त् अथवा तत्तु शकलं क्रूरं स्यान्मुन्कलीवकं क्रूरं वा खारिजं च स्यात् तदा तत्र फलं दिशेत् विभागस्तु नियोगेन न तदा स्यान्नात्र संश ७३

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

=आतवेखारिजं=वापिचोक्तारव्यं=वायदाभवेत् परस्परंतदा तेषांभागिनांकलहोभवेत् अथवा तत्तुशकलंनकीयलरव
दं=भवेत् अंकीशं=हुमराहं=वातदा तत्रफलंभवेत् परस्परंभवेद्युद्धंकलहश्चमहान्भवेत् विद्वेषस्यकृतेप्रश्नेरमलंहिवि
लोकयेत् प्रथमान्नवमाच्चैवशकलंकार्यमुत्तमंएतच्छकलसंबंधःपृच्छकस्यचवर्ततेसप्तमाद्दशमाच्चैवशकलंकार्यमु
त्तमंएतच्छकलसंबंधेविद्विषासहवर्ततेएतस्मिंछकलद्वंद्वेसौम्यंयत्स्याद्बलाधिकंतदेवचशुभस्थानेपुनरागतमस्तिचेत्
तच्चापिचशुभस्थानेकेंद्रेवास्यात्पुरांफरंयद्वापरापफरेकेंद्रेतदेवपुनरागततदातुन्यायकर्तारःसर्वेभूपादयोपिचपक्षपा
तंप्रकुर्वंतियस्यस्याच्छकलंशुभंअतिसौम्यतराणीहशुभसंचेष्टितानिचपंचचैवशकलानिस्युस्तान्यत्रैवलिखाम्यहंल
ह्याणं=तुस्तदारवीलं=तुस्तत्वारिजकं=तथाआतवेदारिवलं=चैवकद्गुदारिवलकं=तथाएतानिशकलानिस्युःपंचसं
ख्यानिसर्वतःतथैवपंचक्रूराणिक्रूरभावानिचैवहितान्यप्यत्रप्रलिख्यंतेयथाहयवनःपुरा उक्ताचकद्गुखारीजं==हु
मरा=चांकीशं=तथाआतवेखारिजं=चेतिपंचक्रूराणिनिर्दिशेत् जमातं=चतरीकं=चयोगवाहीभवेद्ध्रुवंसौम्येनसहसौ
म्यंस्यात्क्रूरेणक्रूरमेवचनकीयलरवदं=चैवमध्यक्रूरंप्रकीर्तितंफरहा=शकलंचैवमध्यसौम्यंप्रकीर्तितंइजमाया
ख्य=शकलंवयाजारव्यं=तथैवचसौम्येनसहसौम्यंस्यात्क्रूरेणक्रूरमेवचएतद्द्वयंसावितारव्यंयोगवाहीनिकथ्यतेपू

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰
७५

वोक्तं शकलं ह्वं ह्वं यत्परस्य वैरिणोः तच्चेद्दिग्ज्ञतिमायाख्यं ॥ ववाजं वा भवेद्यदि ॥ दशमे पंचमे स्थाने न चेत्स्यात्पुनरागतं तदा
तुन्यायकर्त्तारः सर्वे भूपादयश्च वै पक्षपातं प्रकुर्वंति यस्येदं शकलं भवेत् अथवोत्पन्नशकलं स्थाने यत्सुक्षिपक्षतः तस्मि
न्स्थाने तु दशमं तथा पंचदशं तु वै शकलं पुनरायातं यदि तर्हि फलं दिशेत् तदा तु न्यायकर्त्तारः सर्वे भूपादयश्च वै पक्षपातं
प्रकुर्वंति यस्येदं शकलं भवेत् यद्युभयोस्तु शकले समानगुणलक्षणो यदा तदा भवेन्मैत्री विद्विषोरुभयोरपि प्रश्ने तु शा
स्त्रवादस्य रमलं कारयेद्बुधः प्रथमाच्च तृतीयाच्च शकलं कार्यमुत्तमं एतच्छकलसंबंधः पृच्छकेन सहास्ति च समन्नमान्नव
मास्त्वेव शकलं यद्भविष्यति संबंधस्तस्य संप्रोक्तः प्रतिवादीजनेन च उभयोर्वादिनोरेतद्युक्तं शकलद्वयं सतद्वयं यच्छकलं
नद्यारणाख्यं ॥ भविष्यति यद्यातु स्वतवारीजं ॥ नुस्वराखिलकं ॥ नुवा आतवेदाखिलं ॥ चैव जमाताख्यं ॥ तथैव च अथवे
जतिमायाह्वं ॥ तदा तत्र फलं दिशेत् एतच्छकलसंबंधिपुरुषस्य भवेज्जयः अथवा तत्तु शकलमुल्लाख्यं ॥ भविष्यति नकी
पलखरं ॥ वापि कत्रुस्वारिजकं ॥ तथा आतवेस्वारिजं ॥ वापि तथैवांकीशसंज्ञकं ॥ तत्संबंधिनिरस्यैव फलं तत्र विनिर्दिशेत्
भवेत्पराजयस्यस्य बहुदैन्यमवाप्नुयात् उभयोः शकले युद्धा समाने समलक्षणो यदि स्यातां तदा तत्र मैत्री स्यादुभयोरपि
समारब्धे युद्धकाले जयो वापि पराजयः भवेत्कस्येति संप्रश्ने रमलं हि विलोकयेत् प्रथमस्थानकं चैव द्वितीयस्थानकं तथा

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

स्थानकंचैवचतुर्थस्थानकंतथा चतुर्दशस्थानकंचममलेसंभविष्यति एतेषांस्थानकानांचसंबंधप्रतिपादिनां स्थानंपंचदशं
यत्तुतन्मध्यस्थस्यवर्त्तते मुद्राधिकारिराशेश्चैवतत्स्थानंसंप्रकीर्त्तितं एतेषांस्थानकानांतुयत्रस्याच्छकलंशुभंवलिष्टंचजयः
स्यात्तत्संबंधिपुरुषस्यच शकलंपंचदशमंपृछकस्थानसंचये यदिस्यात्पुनरागतंतदातस्यभवेज्जयः मुद्राधिकारिमध्यः
स्थाः कुर्युस्तत्पक्षपातकं यदिस्यात्पंचदशमंविपक्षस्थानसंचये तदामुद्राधिकारीस्याद्विपक्षस्यप्रियंकरः मध्यस्थो
पिविपक्षस्यपक्षपातकरोभवेत् अथवापंचदशमेस्थानेचेत्पुनरागतं नवपंचमदृष्टिःस्याद्यद्वा त्वेकादशेभवेत् तदा
तयोर्भवेन्मैत्रीपूर्ववैसुहृत्कालतः प्रतिवादिजनात्पूर्वंसापिमैत्रीभवेद्ध्रुवं तथैवपृच्छकस्यापिस्थानेप्येतान्निरीक्षयेत्
पूर्ववच्छकलंदृष्ट्वापूर्ववत्फलमुच्चरेत् अथवाप्रथमंयद्वाशकलंयत्त्रयोदशे यदिस्यादष्टमस्थानेद्वादशेवाचतुर्दशेपुन
रागतमेतच्चतथापंचदशेगृहे शकलंसौम्यदारवीलंतदामैत्रीभवेद्ध्रुवं भवेत्पृछकमूलेनमैत्रीत्यत्रहिनिर्दिशेत् अथवा
सप्तमंचैवतथावाष्टमकंचवै प्रथमेनवमेवापितथैवैकादशेगृहे यदिस्यात्पुनरायाततथापंचदशेगृहे शकलंसौम्यदा
रवीलंयदिस्यात्तर्हितत्फलं परस्परंभवेन्मैत्रीत्येतत्फलमुदीरयेत् बस्ताप्रछकलानांचप्रथमंयत्त्रयोदशं तथापिचस
शकलानांह्यष्टमसप्तचतुर्दशं यदिस्यात्पुनरावृत्तंस्थानेपंचदशेशुभे अथवादशमस्थानेतदातत्रफलंदिशेत् मुद्राधि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰ कारिहस्तेन भवेन्मैत्रीति निर्दिशेत् एतेषां शकलानां च पुनरावर्त्तनं यदि एकादशे तृतीये वा तदा तत्र फलं दिशेत् मित्रहस्तेन
७५ वा तद्वृद्धं धूमूलेनैव तथा भवेन्मैत्रीति वक्तव्यं हीत्याह यवनः पुरा अनेनैव प्रकारेणायत्रैषां पुनरागमः तद्भावसदृशं वा
च्यं फलं चेति विनिश्चितं अथवा तत्तु शकलं क्रूरं स्वारिजकं भवेत् क्रूरं च मुन्कलीवं च तदा तत्र फलं दिशेत् अन्यच्चान्यो
धिकारी च तयोर्मैत्रीं करिष्यति अथवा तत्तु शकलं सौम्यदाखिलकं भवेत् तदा मैत्री भवेन्नूनं तयोस्तत्र परस्परं अथ मार
घ्रमाद्येव शकलं कार्यमुत्तमं यत्किं पृच्छकसंबंधि यद्वा शत्रुगृहे स्थितं इत्यालोक्य ततः पश्चात्फलं तदनु निर्दिशेत् अष्टमे
शकलं यद्वा क्रूरं स्वारिजमागतं विपक्षस्तु तदा कस्मात्करिष्यति पलायनं अथवा प्रथमस्थाने क्रूरं स्वारिजमागतं तदा
कस्मात् पृच्छकस्तु करिष्यति पलायनं उभयोर्विशेषो मध्ये यद्वा गेहमरा भवेत् जपस्तस्य भवेन्नूनमिति तत्र फलं दिशेत् इ
मरा = कब्बदाखीलं = तथा नुस्रतवारिजं = एतन्मध्ये यदेकं चेद्भवेत्पृच्छकसद्मनि दशमे पुनरायाते वलिष्टः पृच्छकस्तदा ए
तेषु शकलेष्वेव यदेकं स्याद्रिपोरिह स्थाने पंचदशे चैव पुनरावृत्तिकृद्भवेत् तदा वलिष्टशत्रुः स्यादित्याह यवनः पुरा अथ ७५
मंशकलं यद्वा षष्ठस्थानगतं भवेत् क्रूरं स्याद्यदि वक्तव्यं रोगी स्यात्पृच्छकस्त्विति स्वस्तक्षीणोपि वा भूयादित्याह यवनः पुरा सप्तमे
शकलं यद्वा षष्ठके वाष्टमे तथा पुनरावृत्तिकृच्चेत्स्यात्क्रूरं चैव विशेषतः विपक्षस्य भवेद्रोगः क्षतं चैव भवेद्ध्रुवं अथ मंशकलं

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

गतंक्रूरंस्याच्चेत्स्वभावेननदातत्त्फलंदिशेत्कारागृहनिवासीस्याद्विपक्षोवदएवचअन्यन्मतांतरंवक्ष्येयज्ज्ञात्वाफलमा
दिशेत्वन्हिविंदुसमादायप्रथमेशकलेस्थितंचतुर्थेवायुविंदुंचसप्तमेजलविंदुकंदशमेपार्थिवंविंदुंसमादायप्रय
त्नतःएतैस्तुशकलंकार्यमेतस्यात्पृच्छकस्यचदशमंशकलंयत्तुतच्छत्रोश्चवर्त्ततेएतच्छकलयुग्मेतुयत्स्यात्सौम्यं
वलाधिकंतत्संवंधिजनस्यैवविजयःस्यान्नसंशयःवुहाराकातयक्तंतमतंमेतदृशीरितंअन्यत्तमतांतरंवक्ष्येयज्ज्ञात्वा
फलमादिशेत्उम्महांतस्यविंदूनांकार्यंशकलमुत्तमंएतच्छकलसंवंधःपृच्छकस्यचवर्त्ततेनवात्तविंदुभिश्चैकंश
कलंकार्यमुत्तमंएतच्छकलसंवंधोविपक्षेराचवर्त्ततेएतच्छकलयुग्मेतुयास्यात्सौम्यंवलाधिकंतत्संवंधिजनस्यैवव
लेस्याद्वितयस्तथाउमहांतनवातंचनामैतस्यमत्तस्यचपरस्परंविद्विषयोर्युद्धेशस्त्रप्रहारकृतंकथंभवेत्कीदृशंचेदेवंप्रश्ने
कृतेसतिरमलंतत्रसंलिख्यद्रष्टव्यंचप्रयत्नतःप्रथमस्थानसंवंधःसैन्यस्यखलुवर्त्ततेतृतीयस्थानसंवंधःशस्त्राणांवर्त्त
तेध्रुवंवलस्यनिर्वलत्वस्यसंवंधःस्यात्तृतीयकेचतुर्थस्थानसंवंधोयुद्धभूमेश्चवर्त्ततेपंचमस्थानसंवंधोयुद्धोत्साहस्यव
र्त्ततेधृष्टतायाभूरितायाःस्थानंतद्वर्त्ततेध्रुवंषष्ठस्थानस्यसंवंधोवाहनस्यचवर्त्ततेअश्वानांचगजानांचसंवंधःषष्ठकेगृहेस
ममस्थानसंवंधोवर्त्ततेप्रतिपक्षिणःद्वितीयस्थानसंवंधस्सैन्यस्यप्रतिपक्षिणःनवमस्थानसंवंधोहतानांचैववर्त्ततेशस्त्रा

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र.सि.
७६

त्वंचसंबंधोनवमस्थानगोभवेत् दशमस्थानसंबंधः शत्रुस्थानस्यवर्तितेएकादशस्यस्थानस्यसंबंधः शत्रुसैन्यकंद्वादशास्था
नसंबंधोनरारलेशकारकः विपक्षद्वयसंबंधिस्थानानांयत्रैवेशुभंवलिष्टंशकलंचस्याज्जयःतत्रविनिर्दिशेत् प्रथमंशकलं
यद्वासप्तमस्थानगंभवेत् सप्तमंशकलंयद्वाप्रथमस्थानसंगतंद्वयोःपरस्परंमैत्रीयुद्धात्पूर्वंभविष्यति अथवाप्रथमस्थाने
हुमराशकलंभवेत् अंकीशंशकलंयद्वातथैवातवरवारिजं ≡≡≡ कज्ञरवारिजकंवापि ≡ शकलंयदिजायतेअष्टमेपुनरागया
ततदातत्रफलंदिशेत् पृष्ठकःखड्गघातेननिधनंप्राप्नुयाद्रणे अथवाप्रथमस्थानेउत्काचशकलंभवेत् ≡ नकीयलस्वदं ≡
वापिशकलंयदिजायतेअष्टमंपुनरागयाततदातत्रफलंदिशेत् रणामध्येपृष्ठकस्तुक्षतयुक्तोभवेद्ध्रुवं अथवासप्तमस्थानेहुम
राशकलंभवेत् ≡ अंकीशंशकलंयद्वा ≡ तथैवातवरवारिजं ≡ कज्ञरवारिजकं ≡ वापिद्वितीयेपुनरागतंतदापृष्ठकशत्रुश्चख
ड्गघातान्मृतोभवेत् अथवासप्तमस्थानेउकला ≡ शकलंभवेत् नकीयलस्वदं ≡ वापिद्वितीयेपुनरागतंतदापृष्ठकशत्रुश्च
खड्गक्षतयुतोभवेत् द्वितीयस्थानकेयद्वाहुमरा ≡ शकलंभवेत् अंकीशं ≡ चापिशकलंतथैवातवरवारिजं ≡ नकीयलस्वदं ≡
वापिकज्ञरवारिजकं ≡ तथाउत्का ≡ शकलंयद्वाद्वितीयस्थानगंभवेत् अष्टमेपुनरायाततदातत्रफलंदिशेत् पृष्ठकस्यच
सैन्यंतुरणामध्येमरिष्यतिवहुशःसंवृत्तंचस्यादित्याहयवनःपुरा अथवाचाष्टमस्थानेहुमरा ≡ शकलंभवेत् अंकीशं ≡ ७६

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

स्वारिज्जंःनकीयलखवदंःवापितथाकञ्जलखवारिज्जंःउकलाःशकलंयद्वायदिस्याद्दष्टमेगृहे द्वितीयेपुनरायातंतदातत्रफ
लंदिशेत् शत्रुसैन्यंतुवहुधापंचत्वंप्राप्नुयाद्ध्रुवंसततयुक्तंभवेत्सैन्यंहीत्याहयवनःपुरा अथवाप्रथमस्थानेशकलंसौम्यमा
गतंदशमेपुनरायातंतदातत्रफलंदिशेत् पृष्ठकस्यजयाभूपाद्दित्याहयवनःपुरा अथवादशमस्थानेशकलंसौम्यमागतं
प्रथमेपुनरायातंतदातत्रफलंदिशेत् अथवासप्तमस्थानेशकलंसौम्यमागतं चतुर्थेपुनरायातंतदातत्रफलंदिशेत् वि
पक्षस्यजयोभूपादित्याहयवनःपुरा यद्वाचतुर्थभवनेशकलंसौम्यमागतं सप्तमेपुनरायातंतदापूर्वफलंदिशेत् अ
थवाप्रथमस्थानेशकलंसौम्यदाखिलंसौम्यसावित्तकंवापितत्केंद्रेपुनरागतंतत्साक्षित्वेतुसौम्यंस्यात्पृष्ठकःस्याज्ज
यीतदा अथवासप्तमस्थानेसौम्यंदाखिलमागतंसौम्यंसावित्तकंवापितत्केंद्रेपुनरागतंतत्साक्षित्वेतुशुभदंतदाशत्रोर्ज
योभवेत् अथवाप्रथमस्थानेहुमराःवांकिशंःभवेत्जमातंःहीज्जमायंःवाद्वादशेपुनरागतंतदाशत्रोर्वधमध्येपृष्ठ
कस्यमरिष्यति अथवासप्तमस्थानेहुमराःवांकिशंःतयाजमातंःइज्जमायंःवाषष्ठकेपुनरागतंतदापृष्ठकवधेतु
विपक्षःपतितोभवेत् यद्वाद्वितीयभवनेशकलंसौम्यमागतंतत्त्र्वकेंद्रेचेतुष्केतुयदिस्यात्पुनरागतंतदापृष्ठकसैन्ये
तुविजयंप्राप्नुयाद्ध्रुवं यद्वाद्वितीयभवनेशकलंक्रूरमागतंपराफेरपुनरायातंतदातत्रफलंदिशेत् पृष्ठकस्यचसैन्यंतु

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰ ७७

पलायनपरं भवेत् अथवाचाष्टमस्थानेशकलं सौम्यमागतं चेत्केंद्रे पुनरायातं तदा तत्र फलं दिशेत् विपक्षस्य च सैन्यं तु
प्राप्नुयाज्जयमुत्तमं अथवाचाष्टमस्थानेशकलं क्रूरमागतं पणफरे पुनर्यातं तदा तत्र फलं दिशेत् तदा विपक्षसैन्यं तु पला
यनपरं भवेत् क्रूरराशिशकलान्यत्र लिख्यंते प्रश्नकारणात् हुमराउकलाचैव तथैवांकीशकं चैव नकीयलखवर्हं चैव
कत्तुरवाजिकं तथा आतवस्वाजिं चैव नुसतवाजिकं तथा ॥ ॥ ॥ ॥ एतानि शकलानि स्युर्यस्य पक्षे विनिश्चितं तस्य सै
न्यं तदाजेयं पलायनपरं भवेत् सौम्यानि शकलान्यत्र लिख्यंते प्रश्नकारणात् लह्याराानुस्तदास्वीलंकज्ज्ञदाखिलकं त
था आतवदाखिलं चैव वयाजारव्यं तथैव च ॥ ॥ ॥ ॥ एतानि शकलानि स्युर्यस्य पक्षे विनिश्चितं जयः स्यात्तस्य सैन्यस्य
यवनेनेरितं यथा फराख्यं चतरीकं च ॥ ॥ यस्य पक्षे भविष्यंति युद्धं न परितप्तः सन् न च युद्धं करिष्यति अथवा यस्य पक्षे तु ज
मातं ॥ बजिमायकं ॥ यदायातं तदा तत्र प्रपंचकपटं भवेत् तत्रापि दशमस्थाने यत्र स्याच्छकलं शुभं पुनरावृत्तिकृद्य
त्र जयस्तत्र भविष्यति समलेप्युभयोश्चैव सौम्यं पंचदशं भवेत् उभयेत्र पुनर्यातं तदा मैत्री विनिर्दिशेत् उभयत्रापि चेत्क्रू
रं शकलं यदि जायते परस्परं तदा नाशो जयश्चान्यस्य वै भवेत् इति सप्तमभवनं अथाष्टमभवनम् अष्टमं भवनं यत्तु तत्र प्र
श्नाभवंति येतानत्र कथयिष्यामि यथाह यवनः पुरा भयस्य विघ्नस्यापि दुःखराशेर्मृत्योश्च पित्रादिधनस्यैव वधस्य च ७७

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

भिर्विलोकनीयाः सदनेष्टमे दिने हि परचक्रभयस्यैव यदि प्रश्नः कृतो भवेत् रमलं तदा कुर्यात्प्रयत्नेन विचक्षणाः कृते तु
रमले तस्मिन्स्थानान्येतानि लोकयेत् प्रथमे च चतुर्थे च पंचमे सप्तमे तथा अष्टमे द्वादशे चैव तथैव च त्रयोदशे षोडशे
दशमे चैव यदि स्युः शकलानि च तु सत्त्वारिज्ञकं चैव ॥ कब्जदाखिलकं ॥ तथा हुमराहं च ॥ जमातं ॥ तथैवेज्जतिमा
यकं ॥ अंकीश ॥ सुकला ॥ चैव नकीयलखदं ॥ तथा कब्जखारिजकं ॥ चैव तथैवातवखारिजं ॥ एतानि शकलानि स्युः
पूर्वोक्तस्थानसंचये तदा तु परचक्रं च निश्चयेनागमिष्यति अत्रापि कंटभवने क्रूराणि शकलानि चेत् वहुधोपद्रवं तत्
हि परसैन्यं करिष्यति देशोद्वासं तथा कुर्यात्परचक्रं न संशयः चतुर्थस्थानकं यद्वा पंचमस्थानके तथा प्रथमस्थानकं
यद्वा यदि स्युः शकलान्यदः हुमरा ॥ उकला ॥ चैव शकलं च तथा किशं ॥ आतवेखारिजं ॥ चैव जमातास्व्यं ॥ तथैव च
एतानि शकलानि स्युः पूर्वोक्तस्थानसंचये तदा तु परचक्रं हि वहुधा भयमुच्यते चतुर्थस्थानके यद्वा पंचमस्थानके
तथा एकादशे तथा स्थाने द्वादशे स्थानके तथा स्थाने पंचदशे चैव षोडशस्थानके तथा सौम्यानि शकलानि स्युस्त
था पंचदशे गृहे यदि स्याच्छकलं सौम्यं तथा चैव तु सप्तमे अष्टमे दशमे चैव त्रयोदशगृहे तथा चतुर्दशे स्थानके च क्रूरा
णि शकलानि चेत्तदा तु परचक्रं हि परावृत्तिर्गमिष्यति मार्गमध्याच्च वा तत्तु भविष्यति पलायितं अथवा प्रथमस्था

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नेत्रयोरशगृहेतथाचतुर्दशेस्थानकेचतथापंचदशेगृहेंषोडशेस्थानकेचैववयदिस्युःशकलान्यदःहुमराःचांकिशंःचै
वयदाचातवस्वारिजंःनकीयलखवरंःवापियद्दोल्कारव्यंःभविष्यतितदातुपरचक्रंहिगत्वास्थान्पुनरागतंअथवाप्रथम
स्थानेसप्तमस्थानकेतथानवमस्थानकेचैवदशमस्थानकेतथाषोडशस्थानकेचैवयदिस्युःशकलान्यदःआग्नेयानि
तथाचैववायवीयानिभूरिशःतदातुपरचक्रंहिगत्वापिपुनरागमतंभयविघ्ननिमित्तंतुहतेप्रश्नेविचारयेत्रमलंतुप्रयत्नेन
तत्रस्थानानिलोकयेत्प्रथमेचाष्टमेचैवनवमेदशमेतथासौम्यानिशकलानिस्युर्यत्तर्हिफलमादिशेत्पृछकस्यभयंनास्ति
निर्भयश्चभविष्यतिअथवातत्ररमलंजमातंःहुमराःतथाउत्काःनकीयलखवरंःआतवेस्वारिजंःनथाअंकीशंःशकलं
चैववहुशःपुनरागतंयदितर्हिफलंवाच्यंपृछकस्यभयंभवेत्अथवाचाष्टमस्थानेलह्यानीशकलंभवेत्ःफरारव्यंःनुस
दारवीलःतथैवातवदाखिलंःवयाजंशकलंचैवःयदिस्यादष्टमेगृहेएतच्छकलमध्येतुयत्किंचिच्छकलंभवेत्स्थानेपं
चदशेचैवतदानस्यात्क्षयंवहुयद्वाचतुर्थभवनेषष्ठस्थानेतथैवचअष्टमस्थानकेचैवशकलंकूस्मागतंनदाभयंबहुतरंपृछ
कस्यभविष्यतिअथवाह्यष्टमस्थानेतरीकंःशकलंभवेत्नकीयलखवरंःवापिउत्कारव्यंःतथैवचआतवेस्वारिजंःचैवता
थैवहुमराह्वयंःअंकीशंःशकलंचैवयदिस्यादष्टमेगृहेप्रथमेपंचदशमेपुनरावृत्तिकस्त्वैवेमृत्युरेवभयंस्याद्वायावद्बुधि ७८

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

हसंवेदेत् अथवा प्रथमस्थाने जमातं॥ हुमराथवा॥ जायते पंचदशमे तद्देव पुनरागतं अष्टमे क्रूरशकलमुमहांते पुनर्गतं कथं
नालच्छेदनांतं पृछकस्य भयं भवेत् अथैव केंद्रभवने यदि स्यात्पुनरागतं हस्तकर्तनपर्यंतं तदा विघ्नं समादिशेत् अथवा कज्ज
दासवीलं॥ षष्ठस्थानगतं भवेत् अष्टमस्थानकं यद्वा नवमस्थानगं तु वा द्वादशस्थानकं यद्वा पुनरावृत्तिकृद्भवेत् धनहानिः पृ
छकस्य निश्चितं हि भवेद्ध्रुवं अंकीश॥ शकलं यद्वा द्वितीयस्थानगं भवेत् अष्टमे षष्ठके वापि यद्वापि दशमे तथा पुनरावृत्तिकृ
त्रैव तदा तत्र फलं दिशेत् पृछकस्य धनं चैव तस्याहानिर्गमिष्यति अत्र पंचदशे स्थाने यदि नु स्याद्धाविलं॥ सर्वत्र पृछकस्यैव
निश्चितो हि भवेद्ध्रुवं द्वादशस्थानगं यद्वा शकलं प्रथमे भवेत् प्रथमे शकलं यद्वा द्वादशस्थानगं भवेत् तत्रैव क्रूरदृष्टि शकलं तदा
तत्र फलं दिशेत् कारागृहाणि निर्बंधस्तदा स्यात्पृछकस्य च द्वादशमे वापि शकलमंकीशाख्यं भवेद्यदि शृंखलाबंधनं चैव ग
ले स्यात्पादयोस्तथा पृछकस्येति विज्ञेयस्ताकवेडीति नामतः अथवा तत्तु शकलमुकलाख्यं॥ भविष्यति नकीयलखदृय
हा॥ तदा तत्र फलं दिशेत् कशाघातैस्ताड्यमानं पृछकस्येति निश्चितं अथवा तत्तु शकलं हुमराख्यं॥ भविष्यति आतवेखारि
जं॥ वापि तदा तत्र फलं दिशेत् अग्निना दह्यते चैव पृछकस्त्विति निश्चितं अथवा तत्तु शकलं कज्जखारिजकं॥ भवेत्तु स्त
त्वाविजकं॥ वापि तरीका॥ ख्यं भवेद्यदि पृछकस्तु तदा नूनं जलमध्ये भयं लभेत् अथवा शूलिकाप्रोक्तो भवेदिति विनि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पृच्छकः पृच्छति तत्रास्मलं हि विलोकयेत् चतुर्थशकलं चैव तथैवाष्टमकं तु यत्॥

ए.सि.
७९

श्चितं मरणं किं निमित्तेन भवेदिति विनिश्चितं पृच्छकः पृच्छति तत्रास्मलं हि विलोकयेत् तस्मात्सर्वफलं वाच्यमित्याह यवनः
उभयोर्योगतश्चैव शकलं कार्यसत्तमं किं संज्ञशकलं तत्तु सम्यक् युक्तिं विलोकयेत् फलमेतद्धि निर्दिशेत् विदेशे मरणं च स्यादेकस्मादिति
पुरायदित्तच्छकलं भूयात्तु सुतवारिजः संज्ञकं तद्द्वारं वा भवेत् हि॥ वापितदात्तत्र फलं दिशेत् विदेशमरणं च स्याद्दीर्घेण
निर्दिशेत् अथवा तत्तु शकलं कज्जरवारिजकं॥ भवेत् आत्तवेरवारिजं॥ वापि तदा तत्र फलं दिशेत् विदेशमरणं च स्याद्दीर्घेण
चरीनवत् अथवोच्चस्थलात्पाताद्भविष्यति विनिश्चितं अथवा तत्तु शकलमातवेदारिवलं॥ भवेत्तु सद्दारिवलकं॥ वापि
कज्जदारिवलकं॥ तथा तदा तु मरणं भूयात्स्वगृहे शूलयोगतः परंतु सुखरूपेण संपत्तीकृतयोगतः अथवा तत्तु शकलमंको
शारव्यं भवे॥ यदि तदा तु मरणं वाच्यं स्वगृहे शूलयोगतः यद्वा कारागृहे भूयात्पृच्छकस्येति निर्दिशेत् अथवा तत्तु शकलं फर
हारव्यं भवेद्यदि तरी खं वा तदा तत्र फलमेतद्धि निर्दिशेत् मार्गमध्ये भवेन्मृत्युर्द्विदोषकृतकोपतः चित्तसंतापतश्चैव मरणं
साद्धि निश्चितं अथवा तत्तु शकलमुकलारव्यं॥ भवेद्यदि नकीयलखरं॥ वापि तदा तत्र फलं दिशेत् भवेन्मृत्युर्मार्गमध्ये को
घान्यश्चात्सुतापतः कशाघातेन वा चैव तथा व्याघ्रादिभक्षणेः अथवा तत्तु शकलं वयाजारव्यं॥ भवेद्यदि ह्रज्जमायाह्वयं चे
व॥ जमातारव्यं॥ तु वा भवेत् तदा मृत्युः स्वके गेहे भवेत्तस्य विनिश्चितं कृतेष्युपाये बहुशो न भवेद्रोगसंक्षयः अकस्मान्मरणं

CC-0- Jangamwadi Math Collection. Digitized by eGangotri

एवं ३ भवेद्यदि तदा स्वगेह एव स्यान्मृत्युः शस्त्रादियोगतः। क्षतादिना च रोगेण मार्गरोधकहस्ततः। यद्वा चौरकरेणैव यद्वा व्या
घ्रादिभक्षणैः अथवा विषयोगेन सर्पदंशेन वा पुनः एतस्य शकलस्यैव पुनरावृत्तिरादरात् विलोकनीयः प्रयत्नेन यस्मिन्स्था
नेस्य यध्रुवं तत्त्वादिस्थानुयोगेन फलमेतद्धि निर्दिशेत् तनुस्थाने स्वतश्चैव धनस्थाने धनाद्भवेत् सहजस्थानगे चैव सहजान्मृ
त्युरेव च एवं स्थानानुमानेन शकलं फलमादिशेत् शकलं प्रथमस्थाने पुनरागतमस्ति चेत् दुःखस्यात्क्रोधचिंतायायो
गान्मृत्युः स्वयं भवेत् द्वितीयस्थानगं चेत्स्याच्छकलं पुनरागतं धनाच्च धनिकाच्चैव मध्येभ्यो मरणं दिशेत् तृतीयस्थानकं चे
त्स्याच्छकलं पुनरागतं बंधुभ्यो भगिनीभ्यश्च सुहृद्भ्यश्च तथैव च समीपयात्राचलनान्मरणं स्याद्धि निश्चितम् चतुर्थस्थान
गं चेत्स्याच्छकलं पुनरागतं पितृवृत्तिनिमित्तेन तथा स्थाननिमित्ततः देशादिकं निमित्तेन भवेन्मृत्युरितीरयेत् यदि च पंच
मस्थाने शकलं पुनरागतं तदा पुत्रात्प्रेमपाचात्तथा का शकलाच्चैव भवेन्मृत्युर्विनिश्चितं यथाह यवनः पुरा अथवा षष्टक
स्थाने शकलं पुनरागतं स्त्रीजनाद्धैकभागाच्च नरो मृत्युं गमिष्यति धनादिवृत्तियोगेन नष्टत्वं चौर्यकर्मणा। अथवा नवम
स्थाने शकलं पुनरागतं तदा यात्राप्रसंगेन अर्थतो देशतश्चैव शस्त्रादिकनिमित्तेन भवेन्मृत्युर्विनिश्चितं अथवा दशमस्था
ने शकलं पुनरागतं तदा व्यापारतश्चैव राजतो मातृतश्च वै मरणं च भवेन्नूनमित्याह यवनः पुरा अथवैकादशस्थाने शक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰
८०

तंपुनरागतंपुत्रबंधनिमित्तेनतयास्थूलचतुष्पदातं कुत्रापिशकलंनस्यात्पुनरावृत्तिकुर्यादितदातुसुक्षिपक्षेरास्थाना
त्सर्वंफलंदिशेत् वृत्तेइन्दुनस्यचप्रश्नेकृतेसमलंवीक्ष्यते प्रथमाच्छकलाच्चैवतथैवचचतुर्दशात उत्पन्नंशकलंकार्यंप्र
यत्नेनमनीषिभिः उत्पन्नादष्टमाच्चैवशकलंकारयेद्बुधः तस्मात्सर्वफलंवाच्यमित्याहयवनःपुरातंच्चेद्दाखिलकंसो
स्थंयदाभवतिनिश्चितंतयाचनुस्वदाखीलंःकत्रुदाखिलकंः चवैआतवेदाखिलंःचेवतदातत्रफलंदिशेत वृत्यादिकं
धनंचैवमित्रंचैनागमिष्यति अथवातत्तुशकलमकीशाख्यंःभवेद्यदितदाकुछाकाष्टतरलभेहृतिधनादिकं अथवा
तत्तुशकलंफराख्यंःवातरीकवंःतदाकिंचित्समागच्छेत् किंचिन्नेवेतिनिर्दिशेत् अथवातत्तुशकलंजमाताख्यंःभ
वेद्यदिरज्जमायाहयंःचैववयाजाख्यंःतथैवचनदाविलंबमेवस्थान्नात्रकार्याविचारणा अथवातत्तुशकलंलह्या
णाख्यंःभवेद्यदिनुस्वतवाजिकंःवापितदातत्रफलंदिशेत् पृच्छकःसर्वमेवेहत्यजेद्धृतिधनादिकं अथवातत्तुशक
लमातवेरखारिजंःभवेत्कव्रखारिजकंःवापिनकीयलखदंःतुवाउकलाःहुमराःहुवातदावृत्तिधनादिकंनाग
च्छेन्नहितद्वारयेक्ततंवृत्तिधनादिकं अथवाद्वितीयस्थानेसौम्यदाखिलमागतं अष्टमेसौम्यखारीजंतदातत्रफलंदिशे
त अनायासात्समागच्छेत्तदावृत्तिधनादिकं अथवाद्वितीयभवनेक्रूरदाखिलमागतं अष्टमेक्रूरखारीजंतदातत्रफलं

८०

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

चेत्प्राप्तं तदावृत्ति धनादिकं यद्वा द्वितीयभवने दाविलं शकलं भवेत् अष्टमे चैवदाखीलं तदा तत्र फलं दिशेत् कदापि न
लभेन्नूनं तदावृत्ति धनादिकं यदि वा प्राप्नुयान्नूनं तदा तु कलहेनैव यद्वा द्वितीयभवने तथैवाष्टमके पि च खारिजं शक
लं चस्यात्तदा तत्र फलं दिशेत् उभयोरपि वृत्तेश्च धनस्य च व्ययो भवेत् न भवेदुभयोः कार्यं तदावृत्ति धनादिभिः इत्यष्ट
मभवनं अथ नवमभवनम् नवमं भवनं यत्तु तद्दिदानीमिहोच्यते प्रश्नः पांथस्य यात्रायामृशाप्रश्नस्तथैव च धर्मशा
स्त्रस्य प्रश्नः प्रश्नो वै नि धनस्य च न्यायोपार्जितवित्तं चदैवात्प्राप्तो भविष्यति तत्प्रश्नश्च तथा दानप्रश्नश्चैव शुभावहः
पिराउदानस्य च प्रश्नो रात्रिस्वप्नस्य चैव हि प्रश्नो निरूप्यते चैव नवमे भवने शुभे प्रथमस्थाने शकलं सौम्यदाखिलकं भवे
त्तं तद्वच शकलं भूयो दशमे पुनरागतं अथवा दशमस्थानाऽधिपस्य शकलं भवेत् प्रथमस्थानके चेत्स्यात्तदा तत्र फलं दि
शेत् शीघ्रमेव परावृत्य पांथश्चैवागमिष्यति अथवा प्रथमस्थाने शकलं मावितं भवेत् चतुर्थे वा सप्तमे वा पुनरागतम
स्ति चेत् तदा तु चिरकालेन पांथस्यागमनं भवेत् तथैव संस्थितः पांथः पश्चाच्चैव चलिष्यति अथवा प्रथमस्थाने सौम्यं दाखि
लमागतं यद्वा सौम्यं मुन्कलीवं पुनरागतमस्ति चेत् पंचमस्थानके यद्वा तथैवैकादशे गृहे तदा पांथात्समाचारः पत्रं चैवा
गमिष्यति अथवा प्रथमस्थाने सौम्यं दाखिलमागतं सौम्यं च मुन्कलीवं च तच्चेत्स्यात्पुनरागतं तृतीये नवमे वापि तदा

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰ ८१

तत्रफलंदिशेत्मार्गमध्येसमायातिपांथएवंसमादिशेत्अथवाप्रथमस्थानेक्रूरंशकलमादिशेत्द्वितीयेचषष्ठकेचैवतथै
वैकादशेगृहेद्वादशस्थानकेचैवपुनरागतमस्तिचेत्तदापांथोदूरमार्गेदुःखीशोकोनिराश्रयःवर्त्ततेफलमेतद्धिवक्तव्यंच
मनीषिभिःप्रथमान्नवमाच्चैवशकलंकार्यमुत्तमंउत्पन्नःशकलात्स्मात्तथापंचदशाच्चवैउत्पन्नंशकलंकार्यंतस्मात्स
र्वफलंदिशेत्एनच्छकलकंचेत्स्याल्लह्याराणारव्यंःसुशोभनंतदापांथःपरावृत्यचिरेणैवागमिष्यतिअथवातत्तुशकलंक
ज्जुदाखिलकंःभवेत्तदापांथःशीघ्रमेवनिजवेश्मागमिष्यतिअथवातत्तुशकलंकज्जखारिजकंभवेत्तदाकष्टेनैवपां
थःसदनंवागमिष्यतिअथवातत्तुशकलंजमानारव्यंःभवेद्यदिअलभ्यलाभवत्पांथःतदागच्छेच्चिरेणैवअथवातत्तुश
कलंफरारव्यंःचेद्भविष्यतिधनपत्रादिकंपांथःप्रेषयिष्यतिसत्वरंअथवातत्तुशकलमुकलारव्यंःभवेद्यदितथापांथः
परावृत्यरोगयुक्तागमिष्यतिअथवातत्तुशकलमंकीशारव्यंःभवेद्यदितदापांथःपरावृत्यशोकचिंतासमाकुलःपरावृ
त्यसमागच्छेच्छीघ्रमेवनसंशयःअथवातत्तुशकलंहुमरारव्यंःयदाभवेत्चिरकालेनवैपांथस्तदागच्छेन्निजंगृहंअथ
वातत्तुशकलंनुस्रतखारिजकंःभवेत्वार्त्तापत्रादिकंपांथःप्रेषयिष्यतिवैतदाअथवातत्तुशकलंनुस्रतद्दाखिलकंःभवेत्
तदापांथःपरावृत्यमार्गमध्येविनिश्चितंअथवातत्तुशकलंहाातवेरवारिजंःभवेत्निर्द्धनःसंस्तथापांथोविमनस्कश्च ८१

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

यलखदंभवेत ॥ तदामागीत्पराव्टत्यपांथश्चैवागमिष्यतिअथवात्ततुशकलमिज्जमायाह्वयं ॥ भवेत्ततदासंसारिकात्का
यलखदंभवेत ॥ तदामागीत्पराव्टत्यपांथश्चैवागमिष्यतिअथवात्ततुशकलंतरीकारव्यं ॥ भवेद्यदितदापांथोमा
र्यान्मरनःस्यात्पांथएवहि चिरकालेनसदनेसमागच्छेदितिस्फुटंअथवात्ततुशाकलंतरीकारव्यं ॥ भवेद्यदितदापांथोमा
र्गमध्येसमागच्छतिनिश्चितंअथवानिश्चयंकुर्यादागमिष्यतिसंदिशेत्प्रथमाच्चचतुर्थाच्चशकलंकार्यसुत्तमंसप्तमा
द्दशमाच्चैवकार्यशकलमुत्तमंउभयोर्योगतःकार्यमन्यच्छकलमुत्तमंतस्मात्सर्वफलंवाच्यंसौम्यक्रूरादियोगतःक्रूरे
क्रूरंशुभेसौम्यंदाखिलप्राप्तिकारकंस्वारिजेव्ययकारीस्यात्मावितास्थिरमेवचसुन्कलीवपराव्टत्तिसूचकंचैवमादिशेत्प्र
श्नःकृतश्चेद्यात्रायारमलंतत्रचालयेत्ततत्रयत्प्रथमस्थानंपृच्छकस्यतुतद्भवेत्सप्तमस्थानसंबंधःप्रोच्यतेत्रविशेषतःयात्रा
प्रसंगाद्गमनंयस्मिन्स्थानेभविष्यतितस्यस्थानस्यसंबंधःप्रोच्यतेसप्तमेतथा यात्राप्रसंगाद्गमनंयस्मिन्संबंधिगंभवेत्
तस्यापिचैवसंबंधःसप्तमस्थानकेभवेत्अष्टमस्थानसंबंधःपृच्छकस्यधनेनचतस्मिन्स्थानेनिवासेषुसंबंधःपंचमेभवे
त्ततत्स्थानेरिपुसंबंधःषष्टस्थानेनवैभवेत् यात्रामार्गादिसंबंधोनवमस्थानकेभवेत्पराव्टत्यागमस्यैवसंबंधोदशमेभ
वेत्परिपाकस्यचस्थानेसंबंधोदशमेभवेत् एतेषुस्थानसंबंधेक्रूरेणशकलंभवेत्तदासर्वंसमीचीनमित्याहयवनः
पुराअथवाप्रथमस्थानेतृतीयेवाचतुर्थकेनवमस्थानकेचैवलह्याणाशकलंभवेत ॥ तुस्खतवरिजकंचैव ॥ तरीकंःच

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

फलद्वयं॥एकंवाद्वितयंवापितृतीयंवाभविष्यतिअथवाप्रथमस्थानेपूर्वोक्तंशकलंभवेत्पूर्वोक्तेष्वेवगेहेषुयदिस्या
त्पुनरागत्तंतदायात्रांप्रकुरुतेपृच्छकःशीघ्रमेवहिसुखरूपेणसंगच्छेन्मार्गमध्येविनिश्चितंप्रथमस्थानकेचैवनवम
स्थानकेतथासौम्यानिखारिजानिसुसुन्कालीवानिवातथापंचमेचाष्टमेचैवदाखिलानिशुभानिचेत्तदातुसुखरू
पेणयात्राभवतिनिश्चितंगत्वातत्रधनप्राप्तिर्भविष्यतिविनिश्चितंअथवापंचमस्थानेतथैवाष्टमकेपिचनसांतिशक
लानीहखारिजानिशुभानिचेत्यन्निमित्तंकृतायात्रातत्प्राप्तिर्नभवेत्तदाअथवाप्रथमस्थानेनवमस्थानकेतथासौम्य
दाखिलसंज्ञानिसौम्यसावित्तकानिचेत्क्रूराराशिवायदिस्युश्चेत्तदातत्रफलंदिशेत्यात्रामिथ्याभवेत्तस्ययात्रानस्या॥
द्धिनिश्चितंअथवाप्रथमस्थानेसप्तमस्थानकेतुवैचतुर्थस्थानकेचैवनवमस्थानकेतथाजमातंकब्जदाखीलंतथैवाकी
शसंज्ञिकंवयाजंनुस्वदाखीलंतथैवात्तवदाखिलं॥॥॥॥एतानिशकलानिस्युस्तदातत्रफलंदिशेत्पृच्छकःस्वकु
यात्तर्हियात्रायाःस्यात्पराङ्मुखःअथवाकब्जखारिजं॥तथैवात्तवखारिजं॥यदिस्यात्पूर्वयोगेषुतदातत्रफलंदिशेत्अ
कस्मात्पृच्छकस्तर्हिरोगीस्यादीश्वरेच्छयामार्गविस्मरणायह्यभवेद्वस्तुभयंतुवाअथवाउकलाख्यं॥चनकीपलखदं॥
चवैहुमरा॥चांकिशं॥चैवपूर्वोक्तस्थानकेषुचपृच्छकोमार्गमध्येतुदुःखीस्यात्संहर्तापिवामार्गेवंधकरेभ्यश्चभयं ८२

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

स्तुनष्टंभवेद्यापियथाहयवनःपुरायद्यापंचदशस्थानेयद्याचाष्टमकेपिचउकला॥यदिसंतापोनस्याद्रोगस्तदाध्रुवंक्री
स्यांदिशिभवेद्यात्राशकलेतिविनिश्चियेकृतेप्रश्ने वुधःकुर्यात्कमलस्यक्रियांशुभांयदातुसप्तमास्थैवनवमाच्छकला
तथाशकलंकार्यमुत्पन्नंतस्मात्सर्वफलंदिशेत्‌उत्पन्नंशकलंचैतत्प्राचीदिक्षयदाभवेत्‌प्राच्यांदिशिभवेद्यात्राश
कलेतिविनिश्चितंनदेवशकलंयातंयदापश्चिमदिग्गतंपश्चिमस्यांतदायात्राशकलेतिविनिश्चितंतदेवशकलंयातं
दक्षिणस्यांयदाभवेत्तदादक्षिणादिग्भागेयात्रातुसफलाभवेत्‌कथंयात्राभवेदस्यकृतेप्रश्नेविलोकयेत्‌समंततः
नवमस्थानंयत्नाद्विलोकयेत्‌तत्रैवनवमस्थानेशकलंयत्तुसंगतंतस्मात्सर्वफलंवाच्यमित्याहयवनःपुरानव
मस्थानकेचेत्स्यात्लहाएां॥शकलोत्तमंतदास्याद्बहुशोलाभोविद्याभाग्यंतथैवचसुश्रेष्ठपदलाभश्चभवेदितिविनि
श्चितंयदिस्यान्नवमस्थानेकज्ञदाखिलमागतं॥तदाधनस्यबहुधाकुर्यात्संपादनंवुधःअथवानवमस्थानेकज्ञखा
दिजमागतं॥तदातुशत्रुणासार्द्धंकलहोनिश्चितंभवेत्‌मरणंचभवेन्नूनंतन्निमित्तेननिश्चितंअथवानवमस्थानेश
कलंफलदाभवेत्‌॥तदातुप्रमपात्रंहिस्वयंप्राप्तंभवेत्पथिअथवानवमस्थानेजमातंशकलंभवेत्‌यात्रामध्येतदानू
नंविघाययुक्तितोपिवाधनप्राप्तिर्भवेच्चैवभूमिलाभश्चैवभवेत्‌अथवानवमस्थानेउकला॥शकलंभवेत्‌यात्रामध्ये

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰
८३

महत्कार्यंप्राप्तंस्याद्दाभवेच्चसत्कं अथवानवमस्थानेचांकिशः शकलंभवेत्त तदानवीनादयित्ताप्राप्तास्याद्यात्रया
तया अथवानवमस्थानेहुमरा ः शकलंभवेत्त यात्रामध्येतदानूनंकेनचित्कलहोभवेत् अथवानवमस्थानेवयाजं
शकलंभवेत ः तदायात्राप्रसंगेनसुवस्त्राभरणादिकंवहुशस्त्वंभवेत्प्राप्तमित्याहयवनः पुरा अथवानवमस्थानेनुस्त
रवारिजमागतं ः तदायात्राप्रसंगेनकश्चिद्दिव्यागमोभवेत्त अपूर्ववस्तुलाभश्चशरीरेसुखमुत्तमं अथवानवमस्थाने
नुसहाविल ः मागतंतदायात्राप्रसंगेनकेनचिन्महत्तासह पुरुषराजमैत्रीस्यादित्याहयवनः पुरा अथवानवम
स्थानेचातवेखारिजः भवेत्त तदायात्राप्रसंगेनवंधनंस्याद्धिनिश्चितंकारागृहादिकंचैवतथावैरंचवैभवेत् अथवानव
मस्थानेनकीयलखदः भवेत्त तदाशस्त्रादिकंचैवनीतंचौरेरावैभवेत् अथवानवमस्थानेह्यातवेदाखिलंभवेत्त ः यात्रा
मध्येतदाभूयाद्दानंदसौख्यमेवच अथवानवमस्थानेइज्तमाया ः ह्वयंभवेत्त यात्रामध्येकृतेधातुप्राप्तास्यात्तुविनि ८३
श्चितंचिरकालंभवेत्स्थैर्यमित्याहयवनः पुरा अथवानवमस्थानेतरीकं ः शकलंभवेत्त यात्रामध्येतदास्थैर्यनभवे
द्धिकदाचनएकस्थानेभवेन्नैवस्थैर्यंचेतिविनिश्चितं यात्राप्रश्नेकृतेतत्रसमलंचविलोकयेत् तत्रचेत्सप्तमस्थाने
मातंशकलंभवेत ः वयाजं ः मिजमायं ः वाहुमरारव्य ः तथैवचपृछकस्तुतदायात्रावहुवर्षैकरिष्यतिअस्यापिसंशि

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

वित्तंचेद्भविष्यत्तियावज्जीवंतदायात्रांकुर्यान्नैवपुरंव्रजेत् अथवासप्तमस्थानेकाङ्क्षाखिलमागतं॥नुसहाविरूप्य
चेष॥तथैवात्तवहाखिलं॥पृच्छकस्तुतदात्तत्रयात्रायांस्थिरतोभवेत् अथवासप्तमस्थानेनकीयलखंभवेत्॥फदा
रव्यंवा॥तरीकंवा॥तदात्तत्रफलंदिशेत्तदापृच्छकचित्तेतुनिश्चयेनभविष्यत्तिगमिष्येनवामिष्यामिचित्तेनेच्छेत्कदा
कदाअथवासप्तमस्थानेलहारांशकलंभवेत्॥नुसत्तवारिजकंवापि॥तदात्तत्रफलंदिशेत् पृच्छकःकार्यसिद्धिंच
कृत्वाचपुनरागमेत् अथवासप्तमस्थानेकङ्क्षवारिजमागतं॥आत्तवेखारिजंचैव॥उकलारव्यंतथैवचनिराशःपृच्छ
कस्तर्हिआर्तवेनविनिश्चितंविमनस्कश्चैवनूनमागच्छेन्निजमंदिरंयात्रायांसंगतिःकस्यभवेदितिविनिश्चितंकृते
प्रश्नेतदाकुर्याद्रमलंचविलोकयेत् रमलेनवमस्थानंप्रयत्नेनविलोकयेत्तत्रयच्छकलंभूयात्फलंतदनुसारतः
यदिस्यान्नवमस्थानेसूर्यस्यशकलंशुभंतदासत्ताधिपैश्चैवराष्ट्रलोकैस्तथैवचतथामाराडलिकैर्भूपैर्धनधान्याधिपै
स्तदासंगतिर्निश्चयंभूपादित्याहयवनःपुरा अथवानवमस्थानेचंद्रस्यशकलंभवेत् परवृत्तांतविज्ञैश्चतथैवपद्मूरं
जकैःवस्त्रोत्पत्तिकरैश्चैवतथापानीयधातृभिःहृतैश्चैवचभिल्लैश्चभवेत्संगस्तदाध्रुवं अथवानवमस्थानेशकलं
मंगलस्यचमार्गविरोधकैश्चौरैस्तथास्त्रधिरकर्मभिःघातकैर्हिंसकैश्चैवसर्वरक्षाकरैस्तथा पृच्छकस्यतदाभूयात्सं

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र·सि· ॥ गतिश्चेतिनिश्चितं अथवा नवमस्थाने बुधस्य शकलं भवेत्तदा लेखनकौशल्यैः सदा लेखनकर्मभिः लेखकैश्चि
८४ त्रकारैश्च वैद्यैर्ज्योतिषिभिस्तथा स्मलजैराजकीयैः संगतिः स्याद्धि निश्चितं अथवा नवमस्थाने शकलं स्याद्बृहस्पतेः
तदा च पंडितैश्चैव न्यायान्यायविचारकैः तपस्विभिः सदाचारैः श्रेष्ठैः स्यात्संगतिर्ध्रुवा अथवा नवमस्थाने शुक्रस्य श
कलं भवेत् सुगंधव्यवसायैश्च तथा वै नर्तकैरपि नृत्यकैर्गायकैश्चैव तथा गायकभेदकैः स्त्रीभिश्च संगतिश्च स्यात्त
यानुद्भूतयौवनैः अथवा नवमस्थाने मंदस्य शकलं भवेत्तदा दाक्षिणात्यैस्तदा लोकैरोदरीच्यैरग्निसेवकैः कारागृहादिबं
धैश्चैव तथा कुग्रामवासिभिः कृषीवलैश्च यात्रायां संगतिः स्याद्धि निश्चितं अथवा नवमस्थाने राहोः केतोश्चैव भवेत् श
कलं यदि यात्रायां संगतिः स्यात्तदा ध्रुवं अंधकैः कुष्टिभिश्चैव पंगुभिः पिशुनैस्तथा खंडैश्चेति विनिर्देश्यमित्याह यवनः
पुरा कृशं गृहीतं प्रश्नेन केनाचित्क्रियते भुवि समलं तु तदा कुर्यात् दृष्टव्यं च प्रयत्नतः द्वितीयं तत्र यत्स्थानं तत्स्थानं पृच्छक
स्य हि अष्टमस्थानकं ज्ञेयमृणाधातु धनस्य हि द्वितीये तत्र चेद्गेहे सौम्यं दाखिलमागतं अष्टमे सौम्यस्वारीजं तदा तत्र फ ८५
लं दिशेत् धनिको दास्यति धनं पृच्छकस्तु गृहीष्यति सौम्यसाविनकं चेत्स्यात्फलं दाखिलवद्भवेत् सौम्यं च मुन्कलीनं
स्यात्फलं खारिजवद्भवेत् अष्टमस्थानकं यद्वा क्रूरं दाखिलमागतं क्रूरं साविनकं वापि तदा तत्र फलं दिशेत् नदः ॥

चिह्नु निकश्चेति निश्चितं अथवा प्रथमस्थाने द्वितीयस्थानके तथा कूरस्य खिलसंज्ञं स्यात्कूरं वा सुन्कलीवकं अष्ट [illegible]
नके चेत्स्यात्सौम्यं स्वारिजसंज्ञितं सौम्यं तु सुन्कलीवं तु तदा तत्र फलं दिशेत् धनिको दास्यति धनं परं तु ग्राहकश्चैवं किं
चिद्दास्यति किंचिन्न कल्लौ तदपि द्वुलेभं यद्वा द्वितीयभवने हुमराशकलं भवेत् ः कवुस्वारिजकं ः वापि तथैवातव
स्वारिजं ः तदा किंचिदपि स्तेहीन दास्यति धनं चैव यद्वा द्वितीयभवने तरीकं शकलं भवेत् ः फरहा ः चवयाजं ः वा तदा
तत्र फलं दिशेत् अर्थं चास्यति चार्हेन धनिकश्च धनं तदा यद्वा द्वितीयभवने जमातं ः वेज्तिमायकं ः शकलं यारज्ञाये
ततदा तत्र फलं दिशेत् प्रतिज्ञासमये चैव न दास्यति धनं तदा धनिकै याचितं चेत्स्यात्तदा कुर्याच्च निश्चनतां पश्चाच्च चिर
कालेन धनं दास्यत्यसंशयम् सा स्त्रिराः सत्यवक्तारः किं वा मिथ्याभिवादिनः इति प्रश्ने कृते तत्र रमलं तु विलोकयेत् प्रथ
मात्सप्तमाच्चैव शकलं कार्यमुत्तमम् एतयोस्तभयोर्योगाच्छकलं वा मनीषिभिः उत्पन्नं शकलं यत्तु तच्चेन्नुस्वद्दा खिलं ः
आतवेदा खिलं वापि ः तथा कवुलदा खिलं ः इजमाय ः वयाजं ः वाजमातारव्यं तु वा भवेत् ः सा स्त्रिराः सत्यवक्तारो भूता
वा स्युस्तदा ध्रुवं अथवा तत्तु शकलं फरहारव्यं भविष्यति ः तरीकं ः वापि लह्यारां ः नुस्रतवारिजकं ः तथा के चित्स्युः सत्यव
क्तारः केचिन्मिथ्याभिवादिनः अथवा तत्तु शकलं कवुस्वारिजसंज्ञकं ः आतवे स्वारिजं चैव ः उक्लाह्वं शकलं तथा ः नकीयल

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰
८५

खरं चैव ॥ नरात्तत्र फलं दिशेत् साहिराख्यस्तु नरानूनं नित्यं मिथ्याभिवादिनः द्वयोः परस्परं वादे सत्यमिथ्यादिसंज्ञिते को भवेत्सत्य
वादी च मिथ्यावादी च को भवेत् उभयोरिति संप्रश्ने कृते तु रमलं चरेत् प्रथमान्नवमाच्चैव शकलं कार्यमुत्तमं एतच्छकलसंबंधः पृच्छकेन च वर्ति
ते अष्टमाच्च तृतीयाच्च शकलं कार्यमुत्तमं एतच्छकलसंबंधः प्रतिस्याद्दिजनेन च एतच्छकलयुग्माच्च फलं सर्वं विनिर्दिशेत्
एतच्छकलयुग्मं तु यदि तु सस्वद्राखिलं ॥ आतवद्राखिलं चैव ॥ तथा कब्जलद्राखिलं ॥ जमात ॥ मिज्ञिमा यंच ॥ वयाजास्यंत
थैव च ॥ यदि स्यात्तर्हि सत्यं च वार्तावादीति निश्चितं अथवा कब्जखारिजं ॥ इयातवेखारिजं तथा ॥ नकीयरखरं चैव ॥ तथैवो
काह्वयं चैव ॥ अंकीश ॥ हुमरा चैव ॥ यदि स्यात्तर्हि तत्फलं मिथ्यात्वं न च निर्दिष्टमित्याह यवनः पुरा यद्दा तच्छकलद्वंद्वं फर
हास्यं भविष्यति ॥ नरीकं वापि ॥ लह्यारां ॥ नुस्वतवारिजकं ॥ तथा किंचित्सत्यं च मिथ्या च वदतीति विनिश्चितं विक्रयार्थं
चयद्वस्तु धनिकः प्रेषयिष्यति तस्य प्रश्ने कृते तत्र रमलं च विलोकयेत् प्रथमे च द्वितीये च तथैवैकादशे गृहे द्रष्टव्यं च प्रथ
तेन यच्चाह यवनः पुरा अथवा प्रथमस्थाने शकलं सोम्यद्राखिलं द्वितीये सोम्यखारीजं तत्रात्तत्र फलं दिशेत् विक्रियः शी
घ्रकालेन भवेद्धनिकवस्तुनः अथवा कूरद्राखीलं यद्दा कूरं च साविता तत्र तु विक्रयो न स्याद्धनिकस्य च वस्तुनः अथवा कू
रखारीजं कूरं वा सुन्कलीवकं यदि स्याद्विक्रयस्तर्हि हानिकृत्वा भविष्यति अथवा प्रथमस्थाने तथैवैकादशे गृहे

८५

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

लमध्येभवेद्धानिः कुतोलाभस्तदाभवेत् अथवाप्रथमेस्थानेतथैवैकादशेगृहे तुसहास्विलकं॥ चेत्स्यात्तथाकज्जलमुनि
लं॥ आतवेशास्विलं चैव॥ जमातारव्यंतथैवच॥ चेहुलाभस्तदाभूपादित्याहयवनः पुरा अथवाप्रथमस्थानेतथैवैकादशे
गृहेवयाज॥ मिजमायं॥ वाजमातारव्यंतथैवच॥ यदिस्यान्नहिलाभोवानहानिश्चप्रजायते अथवाप्रथमस्थानेफूरहाश
कलंभवेत्॥ तरीकं॥ वापिलह्याणं॥ तथानुसतवारिजं॥ स्वल्पलाभस्तदाभूपादित्याहयवनःपुरा अथवाप्रथमस्थानेतथै
वैकादशेगृहेहुमरा॥ वांकिशं॥ वापिकज्जरवारिजकं॥ तथा आतवेशारिज्जं चैव उकलारव्यंतथैवच॥ नकीयलखदं चैव॥
यदिस्यात्तर्हितत्फललाभस्तुनभवेत्तर्हि किंचिद्धानिःप्रजायते अथवाद्रव्यहरणंभूपाद्वाचोरभीर्भवेत् अथवास्यान्महद्वि
घ्नंद्रव्यस्येतिविनिर्दिशेत् समुद्रमध्येयात्रायाः कृतेप्रश्नेविलोकयेत् रमलंचप्रयत्नेनततः सर्वफलंदिशेत् तत्रचेत्प्रथम
स्थानेलह्याणं॥ शकलंभवेत्तरीकं॥ चवयाजं॥ वातथैवातवशास्विलं॥ नवमेपुनस्तत्तथैवदशमेगृहे त्रयोदशगृहेचे
वतदातत्रफलंदिशेत् समुद्रमध्येनौकातुतदाशीघ्रंगमिष्यति अथवाप्रथमस्थानेहुमरा॥ शकलंभवेत् उकलारव्यं तु॥ भ
वेच्चैवनकीयलखदंतथा॥ कज्जहास्विलकं॥ चैवतदेवपुनरागतं षष्ठेचाष्टमेचैवद्वादशस्थानकेतथाप्रतिकूलस्तदा
भूपान्नौकायाः पवनश्चैव अर्कलस्यतदानौका जलमध्येविशेषतः अत्रैवकेंद्रस्थानेषु चतुर्थेपिचनिश्चितं क्रूरशकलका

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰
८६

निसुस्तदातत्रफलं दिशेत् तदासमुद्रमध्येतुनौकामग्नाभविष्यति अथवाकेंद्रस्थानेषुचतुर्ष्वपिचनिश्चितं सौम्यानि
शकलानिस्युस्तदातत्रफलं दिशेत् विशेषात्संकटान्मानः पश्चात्सुखरूपतः आगमिष्यति नौकावैतीरस्यचसमीप
तः अथवाप्रथमस्थाने अंकोशंतु ॥ विनिश्चितं जमातं ॥ शकलं चैवतथाकज्जलखारिजं ॥ आतवेरवारिजं ॥ वापियदिस्या
त्प्रथमेगृहे चतुष्के षष्ठकेचैवह्यष्टमेद्वादशेतथा यदिस्यात्पुनरायातं तथान्यच्चविलोकयेत् क्रूराणिशकलानिस्युः कें
द्रस्थानेषुचैवहितदानौकाभवेत्तस्यजलेमग्नाभविष्यति अथवाप्रथमस्थाने यदिस्यादिज्जतमायकं ॥ नुस्रतवारिजकं
वापि ॥ नुसहाखिलकं तथा ॥ फरहारव्यं शकलं चैव ॥ यदिस्यात्प्रथमेगृहे नवमेदशमेचैवतथैवैकादशेगृहे तृतीयस्थान
केचैवयदिस्यात्पुनरागतं तदात्तु चिरकालेनतीरेनौकागमिष्यति परंतुसुखरूपेणायवनानांमतंयथा विद्याप्राप्तौकृतेप्र
श्नेसमलं तु विचारयेत् प्रथमान्नवमाच्चैवशकलं कार्यसुतमं तस्यात्सर्वंफलंचाच्यं यथायवनभाषितं उत्पन्नं शकलंनतु
चेत्स्यान्नुसहाखिलं आतवेराखिलं ॥ वापिजमातारव्यंतुवाभवेत् ॥ इज्जतमायाह्वयं ॥ वापितदातत्रफलं दिशेत् विद्या
माप्निर्वहेन्नराभविष्यतिनसंशयः अथवातत्तुशकलं कज्जदाखिलकं ॥ भवेत्तत्तरीकं ॥ वावयाजंवाफरहारव्यंतु ॥ वाक्से
तंलह्यारशारव्यंतु ॥ वाचेत्स्यान्नुसतवारिजकंतुवा ॥ नदाविद्याभवेत्प्राप्ताकिंचित्किंचिन्नवेभवेत् विद्याभ्यासमवाह्म ८६

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

शकलंहुमरास्यं॥भविष्यति॥उकलास्यं॥भवेद्यापिनकोयलस्वदंतुवा॥कजूरवारिजकंवापि॥तथैवातवरवारिजं॥ॐश्री
शास्यंभवेद्यापि॥तदातत्रफलंदिशेत्विद्यानास्तितदानिछून्मूर्खएवभविष्यतिदानधर्मादिकंकिंचिद्यन्मयाक्रियतेह्यानि
यस्योद्देशेनतत्तस्मैमात्तःस्याद्यानवेतिचक्रेतेप्रश्नेतुसलंकुर्यात्तत्रप्रयत्नतः॥तत्रचेत्प्रथमस्थानेनवमस्थानकेतथाशकलंसो
स्यदास्वीलंभविष्यतितथैवच॥एकादशेपंचदशेषोडशेपुनरागतंतदातस्यसंप्राप्तंयदुद्देशेनयत्कृतं॥अथवाप्रथमस्थानेन
वमस्थानकेतथासौम्यंस्वारिजकंचेत्स्यात्सौम्यंवासुन्नलीवकंतदाकिंचिद्भवेत्प्राप्तंकिंचिन्नेतिविनिर्दिशेत्॥एवोद्दिष्टस्तुयः
स्वप्नस्तस्यप्रश्नेकृतेसति॥मलंरचयेत्तत्रतस्मात्सर्वंफलंदिशेत्तत्रयन्नवमस्थानेतत्स्थंयच्छकलंभवेत्तदेवशकलंयस्मिन्स्था
नेस्यात्पुनरागतंतत्स्थानसंस्थशकलात्सर्वंस्वप्नंविनिर्दिशेत्अथवाशकलंनतत्तुनभवेत्पुनरागतंतदातुनवमस्थानेशकलात्स्व
प्नमादिशेत्तत्रचेत्क्रूरस्वारीजंक्रूरंवासुन्नलीवकंतदानकिमपिस्वप्नोवक्तव्यश्चमनीषिभिः॥तदापिनवमस्थानेशकलंय
त्समागतंतस्मात्स्वप्नंतुसंवाच्यमित्याहयवनःपुरा।वमस्थानकेचेत्स्यात्स्त्रह्याणांशकलंसुभं॥स्वप्नेदृष्टाभविष्यंतिविद्वां
सोधर्मशास्त्रिणाः॥देवालयादिकंचैवश्वेतपीतांशुकादिकंमाणिक्यपद्मरागश्चप्रवालानितथैवच॥चेत्स्वप्नेदृष्टाभविष्यंतिवस्तु
कुक्कुटकादयः॥अथवातत्रसंस्थानेकञ्जरादिकंसमागतं॥स्वप्नेदृष्टाभविष्यंतितदावैभाग्यपुरुषाः॥तदामांडलिकाभूपाधनि

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰
८७

काःस्वर्णविक्रयाःशुभ्रादिव्यगेहानिदानस्थानस्थलानिचेत्पण्यंस्थलंमौक्तिकानितथागोमांजनंचवैगंधकोहरिताल
श्चतथैवचमनःशिलाहरिणोमृगजातिश्चद्रव्यंवैरूप्यकादिकंस्वप्नेदृष्टंभवेत्तत्तथातारंचनिर्दिशेत् अथवातत्रसंस्थानेकं
न्नखारिजमागतं॥स्वप्नदृष्टाभविष्यंतितदाघातकिनोजनाःतथाजारकृत्येनजनानांवधकारिणःचांडालाश्चैवगेहानितु
टितान्युदुसानिचअन्नपूर्णानिगेहानिहरितालोवलिस्तथासारमेयावराहाश्चशलभाःकाकजातयःउलूकाश्चैवसीसंचलोह
कंतुतथैवचस्वप्नदृष्टंभवेत्तेननात्रकार्याविचारणा अथवातत्रसंस्थानेजमातं॥श्यकलंभवेत्स्वप्नदृष्टाभविष्यंतितथावैले
खकानराःदैवज्ञाभिषजश्चैवतथास्मलकोविदाःसारिकाशुद्धिदीर्घादिलेखनग्रास्तथैवचपुस्तकादिकमाराश्चस्तागलानां
तथैवचआनंदकारिगेहाश्चचित्रशालायुतानिचपद्मकूलादिवस्त्राणितथारत्नविशेषकाःकाचकूपाश्चविद्यापरोजारत्या
मणिस्तथापाषाणजातिभेदाश्चमहिषीगोमातंगजाःस्वप्नदृष्टाभविष्यंतिगायकानर्तकास्तथामालंकाराःस्त्रियश्चैववनि
शोरसमणीयकाःरंजितानिचवस्त्राणिसुगंधाविविधास्तथामुक्ताफलानिपाषाणरत्नंविद्रुमयापद्मंहंसमहाःपक्षिणश्चैव
सेनजात्यादयश्चवैरूप्यंमनोहरंचैववृहत्कीलालमेवचस्वप्नदृष्टंभवेत्तत्रहरितंभूमिमंडलं अथवातत्रसंस्थानेस्यात्॥कौ ८७
शाद्वयंयदा॥स्वप्नदृष्टाभविष्यंतितदावैवामलोचनाःतथैवांकुरितंवस्तुयाम्यादिगमनादिकंरा चित्तमश्वसर्वेत्रयाम

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

ध्रुवंस्वप्नदृष्टंभवेदेतदित्याहयवनःपुरा।अथवातत्रसंस्थानेउत्कला॥शकलंभवेत्॥स्वप्नदृष्टाभविष्यंतिकारागृहनिपाति
नाःअग्निश्चपृथिवीचैवपूर्वदिग्गमनादिकं।याम्यदिग्दर्शनंवापितथैवाकुरितादिकं।पुरुषादिवसश्चैवपर्वतह्रस्वशृंगकं
स्थानंचिंताकरंचैवगाढतामिस्रमेवच।विरोधःकलहश्चैववस्त्रंनीलंचलोहितं।उत्पत्तिकान्नदेशाश्चश्मशानानितथैवच
चस्वप्नदृष्टंभवेदेतन्नात्रकार्याविचारणा।अथवातत्रसंस्थानेकुमराशकलंभवेत्॥स्वप्नदृष्टाभविष्यंतिपुरुषास्तस्कराश्च
येप्रभंजनःप्रकोपश्चप्रतीच्यांगमनादिकं।स्थिरताक्रूरताचैवरक्तवर्णास्तथैवच।क्वचित्स्यामन्वकारित्वंमार्गरोधकराश्च
वैरक्तपाषाणकाश्चैववस्तुमृण्मयपात्रकं।मुक्ताशुक्तिस्तथाज्ञेयालोहताम्रोद्भवापिवा।शिविकाचचतुष्कोणासस्नान्यहस
निचमद्यमांसादिकंचैववस्त्राण्यलोहितानिच।स्वप्नदृष्टंभवेदेतदित्याहयवनःपुरा।अथवातत्रसंस्थानेवयाजंशकलंभवेत्॥
स्वप्नदृष्टाभविष्यंतिनद्यास्त्रीजलराशयः।उदीच्यांगमनाद्यंचतथैवाकुरितानिच।श्वेतवर्णाश्चसंप्रोक्तामहदानंदपूर्णतामनोह
रणिहरिताहश्यत्तेभूमिरेवच।प्रवहत्सलिलंचैवतथैवोपवनानिच।फलपुष्पैःसमृद्धानितथाद्युक्षकदंवकं।वस्त्राणिवहुमौ
ल्यानिपात्रेन्नंपरिवेष्टितं।विल्लौरमौक्तिकंचैवमुक्ताशुक्तिस्तथैवच।लवणंचैववंगंचसीसकंकागलाश्चवै।स्वप्नदृष्टंभवेदे
तन्नात्रकार्याविचारणा।अथवातत्रसंस्थाने [illegible] मानं।अग्निश्चा [illegible] न्यंचस्वप्नदृष्टंभवेन्नदीदिवसःपुरुषश्चैव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्व॰सि॰
८८

सौम्यत्वं तु विशेषतः पीतमिश्रः श्वेतवर्णाः पीतमिश्रश्च लोहितः समुद्राधिनारिका चैव न्यायस्य करणं तथा राजगृहसमीपे तु गृह
मुख्यं मनोहरं प्रतीचीसंस्थितं सर्वपात्रं च परिवेष्टितं वस्त्राणि बहुमौल्यानि हंसतीप्रसूतीनि च हरिताश्चैव रत्नानि प्रवालानि त
थैव च पित्तलं हरितालं च सुवर्णमुद्रिकादिकं मृण्मो लोमृण्मयं पात्रं स्वप्नदृष्टं भविष्यति अथवा तत्र संस्थाने तु सदा खिलमार्गतो
ः स्वप्नदृष्टं भवेत्तर्हि जलं चांकुरितादिकम् उदीच्यां गमनाद्यं च सौम्यत्वं सर्वतश्चैव निताश्चानि सं चैव सकृत्स श्वेतवर्णकं वसं
तिस्थानकं चैव मनोहरमनुत्तमं हरितस्थानकं चैव तथैवास्तरणानि च वस्त्राणि च महार्हाणि श्वेतपीतासितानि च मुक्ताफल
विशेषश्च प्रवालानि तथैव च तथा हसंतिकादीनि दुकूलानि च भूरिशः वंशौ रौप्यं मुद्रिकादि स्वप्नदृष्टं भविष्यति अथवा तत्र संस्था
ने भवेद्रात्रौ वरवारिजं ॥ अग्निश्चाकरजन्यं च स्वप्नदृष्टं भविष्यति पूर्वदिग्गमनाद्यं च कृत्ता सर्वतः स्थितो दिवसः पुरुषश्चैव रोग
श्चाप्यभयस्तथा कृष्णमेचकवर्णाभ्यां मिश्रितः पीतवर्णकः अरण्यसदृशानि हगोहानि सुमहानि चेत् जलयुक्तानि चोर्यं
वमृत्पात्रं गोलकस्तथा इष्टिका च चतुष्कोणा लोहसूची तथैव च संकोचितानि वस्त्राणि रंजितानि विशेषतः स्वप्नदृष्टं भवेदे
नद्यश्चाह यवनः पुरा अथवा तत्र संस्थाने नकीयलवरं भवेत् ॥ उदीचीगमनाद्यं च जलं चांकुरितं भवेत् पुरुषाश्च स्त्रियः गोवरा
त्रिश्च दिवसस्तथा स्थानभेदेन वितर्यंत तथा पूर्वमुदाहृतं बहुजलस्य सामीप्ये स्नानानि तथैव च हरितं भूतलं चैव वृक्षसंघस्तथैव च

८८

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

वस्त्रंहरितमेचकंकाचकूपश्चपाषाणविशेषस्तामेवचस्वप्नदृष्टंभवेत्तद्यथाहयवनःपुराअथवातत्रसंस्थानेभवेद्दाल्र
दारिद्र्यं॥ महान्प्रभंजनश्चैवप्रतीचीगमनादिकंसौम्यत्वंरक्तवर्णाश्चपुरुषादिवसस्तथाश्वेतवर्णाश्चवीक्षिताः‌वृक्षमध्येमह
द्गृहेप्रवहत्सलिलंचैवतथागजगृहंचैवअश्वाश्चैवमहद्गेहंतथैवास्तरणानिचदुकूलोर्णासुवस्त्राणिवहुमूल्यंहसंतिकाअ
नेत्रोमध्यमांसेचभक्ष्याभक्ष्यविशेषकाः मुक्ताफलंप्रवालानिमुक्ताशुक्तिस्तथैवचकाचकूप्यस्यप्रस्तारविशेषोविज्ञेयंतथा
स्वप्नदृष्टंभवेत्तद्यथाहयवनःपुराअथवातत्रसंस्थानेशकलंचेज्जितमायकं॥ वायुश्चपश्चिमाशाचसौम्यत्वंक्रूरताचवैपुरुषादिवस
श्चैवस्थिरताधूम्रवर्णकः चिंचितंसद्मंचैवतत्समीपेमहाद्रुमाः जलंवास्तरणानीहवहुमौल्यानिसर्वतः सूचीकर्मकराश्चैवर
मलज्ञास्तथैवचदैवज्ञाश्चतथाप्रोक्ताः कागलोधर्मकारिणः भक्ष्यान्नंचमांसंचहरितश्वेतवस्त्रकंपीतवस्त्रंचसंप्रोक्तंरत्नंम
णिविशेषकः नीलापेरोजकाश्चैवपारदोरूप्यमेवचकागलश्चातिविज्ञेयंस्वप्नदृष्टंमनीषिभिः अथवातत्रसंस्थानेतरीकं
शकलंभवेत्॥ कीलालमुत्तरस्यांचतथैवसमनादिकंसौम्यत्वंवनिताचैवतथैवचविभावरीश्वेतवर्णाःपीतयुक्तस्तथामा
र्गावरोधकः निशाभ्रमपितश्चैवशठाधूर्ताश्चवैजनाः मनोहरंचसद्मंहरितंभूमिमंडलंप्रवहत्सलिलंचैवसफलाश्चमहीरुहाः
आनकीयस्थलंचैवराजकार्यनिकेतनंमुख्यंराजश्चसदनेभूमिशिरंघनादिकंवहुमौल्यान्यासनानिस्वकीयंभ्रमणंतथाश्वे
CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ष्ठानां सदनाद्येव भवेत्पर्यटनं चवैक्षागमां संवर्जितं चदुकूलं वहुमोल्यकं वहुमोल्यं सुरंगं च वस्त्रसंकोचितं तथा विछौरं चैव रु
प्यं च पात्रं च तथैव च वस्त्रं रज्वादिकं चैव कागलाः स्युस्तथैव च स्वप्नदर्शनं भवेदित्ति दित्याह यवनः पुरा इति नवमभवनं संपूर्णं
अथ दशमभवनविचारो लिख्यते दशमं भवनं यत्तु संवंधस्तस्य कथ्यते श्रेष्ठस्य मेलनं चैव स्वयोगक्षेमकारणं आवलं वस्य च
प्रश्नो दशमगृहत्तो वदेत् अहं स्वोदरपूत्यर्थं राजानं वापि मं चित्तं मिलिष्यामि कथं भावि फलं स्यात्तद्वद स्वभो इति प्रश्ने कृते तेन त्वं स्व
लं च विलोकयेत्तत्र यद्दशमस्थानं यत्र तद्विलोकयेत् दशमस्थाने केचेत्स्याच्छुकत्वं सौम्यद्दाखिलं तदा तु मिलनं सम्यग्लान
ं संभविष्यति चित्तवृत्तिर्भवेदेकाद्दयोरित्ति विनिर्दिशेत् वहुलाभश्च भविता यथाह यवनः पुरा अथवा दशमस्थाने सौम्यं खारि
जकं भवेत्तदा द्वयोस्तु चित्तैक्यं भविष्यति न संशयः परंतु स्वल्पलाभः स्यादित्याह यवनः पुरा तत्राप्येकादशस्थानं मिलनीयस्य भू
पतेः द्वितीयं पृच्छकस्येत्ति यवनैः परिभाषितं अत्र स्थानद्वये यत्र शकलं दाखिलं भवेत् सर्वथा तस्य लाभः स्यादित्याह यवनः पुरा अ
थवा दशमस्थाने क्रूरं खारिजमागतं निष्फलं स्यात्तु तत्त र्हि मिलनं चेत्ति निश्चितं मिलनं चेद्भवेत्तर्हि कष्टाधिक्यं भविष्यति चित्तैक्यसुभ
योर्न स्यादित्याह यवनः पुरा वर्तमानवलं वश्च तथैव तारिकाश्च वैकारिष्यामीत्ति यत्प्रश्ने भवेद्दानभवेदित्ति इति प्रश्ने कृते तेन त्वं स्मलं च विलोक
येत्तत्र चेद्दशमस्थाने शकलं सौम्यद्दाखिलं तदा विलंवे लाभः स्यात्सुखरूपेण निश्चितं अथवा दशमस्थाने क्रूरं दाखिलमागतं तदा क

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

व्यतीतत्राकिंचिद्विल्लाभः किंचिन्न स्यादिति श्येत्त वर्त्ततेयो वलं वो मे सोपि तस्याच्छुभावहः अवलं वस्तथान्यो वा कर्तव्यश्चेति पृष्टे तिं त
दासदाहि कर्त्तव्यो रमलः शास्त्रको विदैः तत्रापि दशमस्थाने चतुर्थस्थानके तथा दृष्टव्यं च प्रयत्नेन संबंधस्तस्य कथ्यते विद्यमानावलं
वस्य दशमस्थानमुच्यते ईवातराकलं वस्य चतुर्थस्थानमुच्यते स्थानकद्वयमेतत्तु दृष्टव्यं च प्रयत्नतः यस्मिन्स्थाने भवेत्सौम्यं शकलं तु
शुभावहं उभयत्रापि सौम्यं चेत्समीचीनं तदा भवेत् यद्येकस्मिन्भवेत्सौम्यमेकस्मिन्क्रूरमागतं तदा यत्र भवेत्सौम्यं तद्देवस्याच्छुभाव
हं यत्र स्यात्क्रूरशकलमशुभं तन्निगद्यते उभयत्रापि चेत्क्रूरं शकलं हि भविष्यति रवारिजं च भवेत्तर्हि भवेदशुभमेव च तत एवावलं व
स्य कुर्यात्त्यागेन संशयः अथवा चावलवस्य त्यागः स्यात्स्यतोपि वा एतस्य राज्ञो मात्यस्य मिलनं शुभदं भवेत् इति प्रश्ने कृते तत्र रमलं च
विलोकयेत् इदानीं मिलनं कर्तुं कथं स्यादिति पृच्छति तदा तु दशमाद्गेहात्फलं वाच्यं मनीषिभिः अन्यत्स्थानांतरं गत्वा मिलनं चेत्कृतं
भवेत् तदा कथमिति प्रश्ने चतुर्थात्फलमीरयेत् उक्तस्थानेषु चैतेषु सौम्यानि शकलानि चेत्तदा तच्छुभदं ज्ञेयमन्यथाशुभमेव च प्रश्ने
मातुर्वस्यायाश्चतुर्थात्फलमादिशेत् सौम्यं वा क्रूरभावं वा रोगारोग्यं शुभाशुभं सौम्यक्रूरानुयोगेन विज्ञेयं शकलं बुधैः इति दशमभवनं
म ॥ अथैकादशभवनं ॥ एकादशेस्थानकेस्मिन्मैत्रीप्रश्ने निरूप्यते मित्रयोरुभयोर्मैत्री सुस्थिरा स्यान्नवेति च कृते प्रश्ने तु यत्नेन पश्ये
देकादशं गृहं अथवैकादशे गेहे सौम्यदाखिलमागतं सौम्यं [illegible] फलं दिशेत् मित्रयोरुभयोर्मैत्री स्थिराधिकतरा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र॰सि॰ ८०

भवेत्तलाभश्चापिभवेत्तत्रपरस्परमितिस्फुटं अथवैकादशेगेहेशकलंक्रूरंस्याविलंतथास्थिराभवेन्मैत्रीपरंतुस्वल्पलाभदा अथवैका
दशस्थानेशकलंखारिजंभवेत्तमैत्रीभवेत्तदाभूयान्मित्रयोश्चपरस्परं अथवैकादशस्थानेसंस्थितंशकलंतुवातदेवद्वादशेगेहेय
दिस्यात्पुनरागतंमित्रयोस्तभयोर्भूयात्तदावैरंसुनिश्चितं नजीरङग्रावयानां यदिप्रश्नेकृतोभवेत्तदाप्येकादशस्थानात्फलंव
च्यंमनीषिभिः सौम्यानिशकलानिस्युस्तदानंदप्रदानिचक्रूराणिदुःखदान्येवविचार्यफलमादिशेत् अभीप्सितस्यसंप्राप्तिर्भ
वेद्वानेतिनिश्चितं कृतेप्रश्नेतदातत्रस्थानमेकादशंतुयत् द्रष्टव्यंतुप्रयत्नेनतस्मात्सर्वंफलंदिशेत् अथवैकादशस्थानेदाखि
लंसौम्यमागतंतदातुसुखरूपेणाभवेदिष्टार्थसंगतिः अथवैकादशस्थानेखारिजंशकलंभवेत् तदातुदुःखरूपेणलाभःस्या
दीप्सितस्यच कोशप्रश्नेकृतेदातांफलमेकादशाद्वदेत् ग्रामान्तरगतःकश्चिद्धारयत्यंशुकंकथं कीदृक्किंवर्णकंचैवकिंजा
नीयंतथैवच नवीनंवापुराणंवाकृतेप्रश्नेविलोकयेत् यदेकादशसंस्थानेशकलंहिभविष्यतिसंज्ञाप्रकरणात्तस्यह्यनुमा ८०
नंयथोदितं फलंतदनुसारेणकथनीयंमनीषिभिः चोरःकथंधारयतिवस्त्राणीतियदापुनः कृतेप्रश्नेतदासर्वंपूर्ववत्फलमा
दिशेत् इतिएकादशभवनं लिख्यतेद्वादशस्थानंयवनेनयदीरितं एतस्यमप्रशत्रुत्वंकथंस्यादितिकश्चनः यदापृच्छतिवैतत्ररम
लंकारयेद्बुधः तत्रयद्द्वादशंस्थानंद्रष्टव्यंचप्रयत्नतः तत्रवैद्वादशस्थानेसौम्यक्रूराणियानिचशकलानिभविष्यंतिफलंतेभ्यो

CC.0- Jangamwadi Math Collection. Digitized by eGangotri